5.001.01a अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम्।

5.001.01c यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ॥

5.001.02a अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात्।

5.001.02c समिद्धस्य रुशददर्शि पाजो महान्देवस्तमसो निरमोचि॥

5.001.03a यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः।

5.001.03c आद्दक्षिणा युज्यते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः॥

5.001.04a अग्निमच्छा देवयतां मनांसि चक्षूंषीव सूर्ये सं चरन्ति।

5.001.04c यदीं सुवाते उषसा विरूपे श्वेतो वाजी जायते अग्रे अह्नाम्॥

5.001.05a जनिष्ट हि जेन्यो अग्रे अह्नां हितो हितेष्वरुषो वनेषु।

5.001.05c दमेदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान्॥

5.001.06a अग्निर्होता न्यसीदद्यजीयानुपस्थे मातुः सुरभा उ लोके।

5.001.06c युवा कविः पुरुनिष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः॥

5.001.07a प्र णु त्यं विप्रमध्वरेषु साधुमग्निं होतारमीळते नमोभिः।

5.001.07c आ यस्ततान रोदसी ऋतेन नित्यं मृजन्ति वाजिनं घृतेन॥

5.001.08a मार्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अतिथिः शिवो नः।

5.001.08c सहस्रशृङ्गो वृषभस्तदोजा विश्वाँ अग्ने सहसा प्रास्यन्यान्॥

5.001.09a प्र सद्यो अग्ने अत्येष्यन्यानाविर्यस्मै चारुतमो बभूथ ।

5.001.09c ईळेन्यो वपुष्यो विभावा प्रियो विशामतिथिर्मानुषीणाम् ॥

5.001.10a तुभ्यं भरन्ति क्षितयो यविष्ठ बलिमग्ने अन्तित ओत दूरात् ।

5.001.10c आ भन्दिष्ठस्य सुमतिं चिकिद्धि बृहत्ते अग्ने महि शर्म भद्रम् ॥

5.001.11a आद्य रथं भानुमो भानुमन्तमग्ने तिष्ठ यजतेभिः समन्तम् ।

5.001.11c विद्वान्पथीनामुर्व१न्तरिक्षमेह देवान्हविरद्याय वक्षि ॥

5.001.12a अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।

5.001.12c गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ॥

5.002.01a कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे ।

5.002.01c अनीकमस्य न मिनज्जनासः पुरः पश्यन्ति निहितमरतौ ॥

5.002.02a कमेतं त्वं युवते कुमारं पेषी बिभर्षि महिषी जजान ।

5.002.02c पूर्वीर्हि गर्भः शरदो ववर्धापश्यं जातं यदसूत माता ॥

5.002.03a हिरण्यदन्तं शुचिवर्णमारात्क्षेत्रादपश्यमायुधा मिमानम् ।

5.002.03c ददानो अस्मा अमृतं विपृक्वत्किं मामनिन्द्राः कृणवन्ननुक्थाः ॥

5.002.04a क्षेत्रादपश्यं सनुतश्चरन्तं सुमद्यूथं न पुरु शोभमानम् ।

5.002.04c न ता अगृभ्रन्नजनिष्ट हि षः पलिक्नीरिद्युवतयो भवन्ति ॥

5.002.05a के मे मर्यकं वि यवन्त गोभिर्न येषां गोपा अरणश्चिदास ।

5.002.05c य ईं जगृभुरव ते सृजन्त्वाजाति पश्व उप नश्चिकित्वान् ॥

5.002.06a वसां राजानं वसतिं जनानामरातयो नि दधुर्मर्त्येषु ।

5.002.06c ब्रह्माण्यत्रेरव तं सृजन्तु निन्दितारो निन्द्यासो भवन्तु ॥

5.002.07a शुनश्चिच्छेपं निदितं सहस्राद्यूपादमुञ्चो अशमिष्ट हि षः ।

5.002.07c एवास्मदग्ने वि मुमुग्धि पाशान्होतश्चिकित्व इह तू निषद्य ॥

5.002.08a हृणीयमानो अप हि मदैयेः प्र मे देवानां व्रतपा उवाच ।

5.002.08c इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगाम् ॥

5.002.09a वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा ।

5.002.09c प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥

5.002.10a उत स्वानासो दिवि षन्त्वग्नेस्तिग्मायुधा रक्षसे हन्तवा उ ।

5.002.10c मदे चिदस्य प्र रुजन्ति भामा न वरन्ते परिबाधो अदेवीः ॥

5.002.11a एतं ते स्तोमं तुविजात विप्रो रथं न धीरः स्वपा अतक्षम् ।

5.002.11c यदीदग्ने प्रति त्वं देव हर्याः स्वर्वतीरप एना जयेम ॥

5.002.12a तुविग्रीवो वृषभो वावृधानोऽशत्र्वर्यः समजाति वेदः ।

5.002.12c इतीममग्निममृता अवोचन्बर्हिष्मते मनवे शर्म यंसद्धविष्मते मनवे शर्म यंसत् ॥

5.003.01a त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः ।

5.003.01c त्वे विश्वे सहसस्पुत्र देवास्त्वमिन्द्रो दाशुषे मर्त्याय ॥

5.003.02a त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन्गुह्यं बिभर्षि ।

5.003.02c अञ्जन्ति मित्रं सुधितं न गोभिर्यद्दम्पती समनसा कृणोषि ॥

5.003.03a तव श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रम् ।

5.003.03c पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनाम् ॥

5.003.04a तव श्रिया सुदृशो देव देवाः पुरू दधाना अमृतं सपन्त ।

5.003.04c होतारमग्निं मनुषो नि षेदुर्दशस्यन्त उशिजः शंसमायोः ॥

5.003.05a न त्वद्धोता पूर्वो अग्ने यजीयान्न काव्यैः परो अस्ति स्वधावः ।

5.003.05c विशश्च यस्या अतिथिर्भवासि स यज्ञेन वनवद्देव मर्तान् ॥

5.003.06a वयमग्ने वनुयाम त्वोता वसूयवो हविषा बुध्यमानाः ।

5.003.06c वयं समर्ये विदथेष्वह्नां वयं राया सहसस्पुत्र मर्तान् ॥

5.003.07a यो न आगो अभ्येनो भरात्यधीदघमघशंसे दधात ।

5.003.07c जही चिकित्वो अभिशस्तिमेतामग्ने यो नो मर्चयति द्वयेन ॥

5.003.08a त्वामस्या व्युषि देव पूर्वे दूतं कृण्वाना अयजन्त हव्यैः ।

5.003.08c संस्थे यदग्न ईयसे रयीणां देवो मर्तैर्वसुभिरिध्यमानः ॥

5.003.09a अव स्पृधि पितरं योधि विद्वान्पुत्रो यस्ते सहसः सून ऊहे ।

5.003.09c कदा चिकित्वो अभि चक्षसे नोऽग्ने कदाँ ऋतचिद्यातयासे ॥

5.003.10a भूरि नाम वन्दमानो दधाति पिता वसो यदि तज्जोषयासे ।

5.003.10c कुविद्देवस्य सहसा चकानः सुम्नमग्निर्वनते वावृधानः ॥

5.003.11a त्वमङ्ग जरितारं यविष्ठ विश्वान्यग्ने दुरिताति पर्षि ।

5.003.11c स्तेना अदृश्रन्रिपवो जनासोऽज्ञातकेता वृजिना अभूवन् ॥

5.003.12a इमे यामासस्त्वद्रिगभूवन्वसवे वा तदिदागो अवाचि ।

5.003.12c नाहायमग्निरभिशस्तये नो न रीषते वावृधानः परा दात् ॥

5.004.01a त्वामग्ने वसुपतिं वसूनामभि प्र मन्दे अध्वरेषु राजन् ।

5.004.01c त्वया वाजं वाजयन्तो जयेमाभि ष्याम पृत्सुतीर्मर्त्यानाम् ॥

5.004.02a हव्यवाळग्निरजरः पिता नो विभुर्विभावा सुदृशीको अस्मे ।

5.004.02c सुगार्हपत्याः समिषो दिदीह्यस्मद्र्य१क्सं मिमीहि श्रवांसि ॥

5.004.03a विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निम् ।

5.004.03c नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि ॥

5.004.04a जुषस्वाग्न इळया सजोषा यतमानो रश्मिभिः सूर्यस्य ।

5.004.04c जुषस्व नः समिधं जातवेद आ च देवान्हविरद्याय वक्षि ॥

5.004.05a जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान् ।

5.004.05c विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि ॥

5.004.06a वधेन दस्युं प्र हि चातयस्व वयः कृण्वानस्तन्वे३ स्वायै ।

5.004.06c पिपर्षि यत्सहसस्पुत्र देवान्त्सो अग्ने पाहि नृतम वाजे अस्मान् ॥

5.004.07a वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे ।

5.004.07c अस्मे रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि ॥

5.004.08a अस्माकमग्ने अध्वरं जुषस्व सहसः सूनो त्रिषधस्थ हव्यम् ।

5.004.08c वयं देवेषु सुकृतः स्याम शर्मणा नस्त्रिवरूथेन पाहि ॥

5.004.09a विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरिताति पर्षि ।

5.004.09c अग्ने अत्रिवन्नमसा गृणानो३ऽस्माकं बोध्यविता तनूनाम् ॥

5.004.10a यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि ।

5.004.10c जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ॥

5.004.11a यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम् ।

5.004.11c अश्विनं स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति ॥

5.005.01a सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन ।

5.005.01c अग्नये जातवेदसे ॥

5.005.02a नराशंसः सुषूदतीमं यज्ञमदाभ्यः ।

5.005.02c कविर्हि मधुहस्त्यः ॥

5.005.03a ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम् ।

5.005.03c सुखै रथेभिरूतये ॥

5.005.04a ऊर्णम्रदा वि प्रथस्वाभ्य१र्का अनूषत ।

5.005.04c भवा नः शुभ्र सातये ॥

5.005.05a देवीर्द्वारो वि श्रयध्वं सुप्रायणा न ऊतये ।

5.005.05c प्रप्र यज्ञं पृणीतन ॥

5.005.06a सुप्रतीके वयोवृधा यह्वी ऋतस्य मातरा ।

5.005.06c दोषामुषासमीमहे ॥

5.005.07a वातस्य पत्मन्नीळिता दैव्या होतारा मनुषः ।

5.005.07c इमं नो यज्ञमा गतम् ॥

5.005.08a इळा सरस्वती मही तिस्रो देवीर्मयोभुवः ।

5.005.08b बर्हिः सीदन्त्वस्रिधः ॥

5.005.09a शिवस्त्वष्टरिहा गहि विभुः पोष उत त्मना ।

5.005.09c यज्ञेयज्ञे न उदव ॥

5.005.10a यत्र वेत्थ वनस्पते देवानां गुह्या नामानि ।

5.005.10c तत्र हव्यानि गामय ॥

5.005.11a स्वाहाग्नये वरुणाय स्वाहेन्द्राय मरुद्भ्यः ।

5.005.11c स्वाहा देवेभ्यो हविः ॥

5.006.01a अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।

5.006.01c अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥

5.006.02a सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।

5.006.02c समवन्तो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर ॥

5.006.03a अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।

5.006.03c अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं स्तोतृभ्य आ भर ॥

5.006.04a आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।

5.006.04c यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ॥

5.006.05a आ ते अग्न ऋचा हविः शुक्रस्य शोचिषस्पते ।

5.006.05c सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥

5.006.06a प्रो त्ये अग्नयोऽग्निषु विश्वं पुष्यन्ति वार्यम् ।

5.006.06c ते हिन्विरे त इन्विरे त इषण्यन्त्यानुषगिषं स्तोतृभ्य आ भर ॥

5.006.07a तव त्ये अग्ने अर्चयो महि व्राधन्त वाजिनः ।

5.006.07c ये पत्वभिः शफानां व्रजा भुरन्त गोनामिषं स्तोतृभ्य आ भर ॥

5.006.08a नवा नो अग्न आ भर स्तोतृभ्यः सुक्षितीरिषः ।

5.006.08c ते स्याम य आनृचुस्त्वादूतासो दमेदम इषं स्तोतृभ्य आ भर ॥

5.006.09a उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।

5.006.09c उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर ॥

5.006.10a एवाँ अग्निमजुर्यमुर्गीर्भिर्यज्ञेभिरानुषक् ।

5.006.10c दधदस्मे सुवीर्यमुत त्यदाश्वश्व्यमिषं स्तोतृभ्य आ भर ॥

5.007.01a सखायः सं वः सम्यञ्चमिषं स्तोमं चाग्नये ।

5.007.01c वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥

5.007.02a कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने ।

5.007.02c अर्हन्तश्चिद्यमिन्धते संजनयन्ति जन्तवः ॥

5.007.03a सं यदिषो वनामहे सं हव्या मानुषाणाम् ।

5.007.03c उत द्युम्नस्य शवस ऋतस्य रश्मिमा ददे ॥

5.007.04a स स्मा कृणोति केतुमा नक्तं चिद्दूर आ सते ।

5.007.04c पावको यद्वनस्पतीन्प्र स्मा मिनात्यजरः ॥

5.007.05a अव स्म यस्य वेषणे स्वेदं पथिषु जुह्वति ।

5.007.05c अभीमह स्वजेन्यं भूमा पृष्ठेव रुरुहुः ॥

5.007.06a यं मर्त्यः पुरुस्पृहं विदद्विश्वस्य धायसे ।

5.007.06c प्र स्वादनं पितूनामस्ततातिं चिदायवे ॥

5.007.07a स हि ष्मा धन्वाक्षितं दाता न दात्या पशुः ।

5.007.07c हिरिश्मश्रुः शुचिदन्नृभुरनिभृष्टतविषिः ॥

5.007.08a शुचिः ष्म यस्मा अत्रिवत्प्र स्वधितीव रीयते ।

5.007.08c सुषूरसूत माता क्राणा यदानशे भगम् ॥

5.007.09a आ यस्ते सर्पिरासुतेऽग्ने शमस्ति धायसे ।

5.007.09c ऐषु द्युम्नमुत श्रव आ चित्तं मर्त्येषु धाः ॥

5.007.10a इति चिन्मन्युमध्रिजस्त्वादातमा पशुं ददे ।

5.007.10c आदग्ने अपृणतोऽत्रिः सासह्याद्दस्यूनिषः सासह्यान्नॄन् ॥

5.008.01a त्वामग्न ऋतायवः समीधिरे प्रत्नं प्रत्नास ऊतये सहस्कृत ।

5.008.01c पुरुश्चन्द्रं यजतं विश्वधायसं दमूनसं गृहपतिं वरेण्यम् ॥

5.008.02a त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्केशं गृहपतिं नि षेदिरे ।

5.008.02c बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्माणं स्ववसं जरद्विषम् ॥

5.008.03a त्वामग्ने मानुषीरीळते विशो होत्राविदं विविचिं रत्नधातमम् ।

5.008.03c गुहा सन्तं सुभग विश्वदर्शतं तुविष्वणसं सुयजं घृतश्रियम् ॥

5.008.04a त्वामग्ने धर्णसिं विश्वधा वयं गीर्भिर्गृणन्तो नमसोप सेदिम ।

5.008.04c स नो जुषस्व समिधानो अङ्गिरो देवो मर्तस्य यशसा सुदीतिभिः ॥

5.008.05a त्वमग्ने पुरुरूपो विशेविशे वयो दधासि प्रत्नथा पुरुष्टुत ।

5.008.05c पुरूण्यन्ना सहसा वि राजसि त्विषिः सा ते तित्विषाणस्य नाधृषे ॥

5.008.06a त्वामग्ने समिधानं यविष्ठ्य देवा दूतं चक्रिरे हव्यवाहनम् ।

5.008.06c उरुज्रयसं घृतयोनिमाहुतं त्वेषं चक्षुर्दधिरे चोदयन्मति ॥

5.008.07a त्वामग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा समीधिरे ।

5.008.07c स वावृधान ओषधीभिरुक्षितो३ऽभि ज्रयांसि पार्थिवा वि तिष्ठसे ॥

5.009.01a त्वामग्ने हविष्मन्तो देवं मर्तास ईळते ।

5.009.01c मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक् ॥

5.009.02a अग्निर्होता दास्वतः क्षयस्य वृक्तबर्हिषः ।

5.009.02c सं यज्ञासश्चरन्ति यं सं वाजासः श्रवस्यवः ॥

5.009.03a उत स्म यं शिशुं यथा नवं जनिष्टारणी ।

5.009.03c धर्तारं मानुषीणां विशामग्निं स्वध्वरम् ॥

5.009.04a उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणाम् ।

5.009.04c पुरू यो दग्धासि वनाग्ने पशुर्न यवसे ॥

5.009.05a अध स्म यस्यार्चयः सम्यक्संयन्ति धूमिनः ।

5.009.05c यदीमह त्रितो दिव्युप ध्मातेव धमति शिशीते ध्मातरी यथा ॥

5.009.06a तवाहमग्न ऊतिभिर्मित्रस्य च प्रशस्तिभिः ।

5.009.06c द्वेषोयुतो न दुरिता तुर्याम मर्त्यानाम् ॥

5.009.07a तं नो अग्ने अभी नरो रयिं सहस्व आ भर ।

5.009.07c स क्षेपयत्स पोषयद्भुवद्वाजस्य सातय उतैधि पृत्सु नो वृधे ॥

5.010.01a अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो ।

5.010.01c प्र नो राया परीणसा रत्सि वाजाय पन्थाम् ॥

5.010.02a त्वं नो अग्ने अद्भुत क्रत्वा दक्षस्य मंहना ।

5.010.02c त्वे असुर्य१मारुहत्क्राणा मित्रो न यज्ञियः ॥

5.010.03a त्वं नो अग्न एषां गयं पुष्टिं च वर्धय ।

5.010.03c ये स्तोमेभिः प्र सूरयो नरो मघान्यानशुः ॥

5.010.04a ये अग्ने चन्द्र ते गिरः शुम्भन्त्यश्वराधसः ।

5.010.04c शुष्मेभिः शुष्मिणो नरो दिवश्चिद्येषां बृहत्सुकीर्तिर्बोधति त्मना ॥

5.010.05a तव त्ये अग्ने अर्चयो भ्राजन्तो यन्ति धृष्णुया ।

5.010.05c परिज्मानो न विद्युतः स्वानो रथो न वाजयुः ॥

5.010.06a नू नो अग्न ऊतये सबाधसश्च रातये ।

5.010.06c अस्माकासश्च सूरयो विश्वा आशास्तरीषणि ॥

5.010.07a त्वं नो अग्ने अङ्गिर स्तुत स्तवान आ भर ।

5.010.07c होतर्विभ्वासहं रयिं स्तोतृभ्य स्तवसे च न उतैधि पृत्सु नो वृधे ॥

5.011.01a जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।

5.011.01c घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥

5.011.02a यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समीधिरे ।

5.011.02c इन्द्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥

5.011.03a असम्मृष्टो जायसे मात्रोः शुचिर्मन्द्रः कविरुदतिष्ठो विवस्वतः ।

5.011.03c घृतेन त्वावर्धयन्नग्न आहुत धूमस्ते केतुरभवद्दिवि श्रितः ॥

5.011.04a अग्निर्नो यज्ञमुप वेतु साधुयाग्निं नरो वि भरन्ते गृहेगृहे ।

5.011.04c अग्निर्दूतो अभवद्धव्यवाहनोऽग्निं वृणाना वृणते कविक्रतुम् ॥

5.011.05a तुभ्येदमग्ने मधुमत्तमं वचस्तुभ्यं मनीषा इयमस्तु शं हृदे ।

5.011.05c त्वां गिरः सिन्धुमिवावनीर्महीरा पृणन्ति शवसा वर्धयन्ति च ॥

5.011.06a त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने ।

5.011.06c स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः ॥

5.012.01a प्राग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्म ।

5.012.01c घृतं न यज्ञ आस्ये३ सुपूतं गिरं भरे वृषभाय प्रतीचीम् ॥

5.012.02a ऋतं चिकित्व ऋतमिच्चिकिद्ध्यृतस्य धारा अनु तृन्धि पूर्वीः ।

5.012.02c नाहं यातुं सहसा न द्वयेन ऋतं सपाम्यरुषस्य वृष्णः ॥

5.012.03a कया नो अग्न ऋतयन्नृतेन भुवो नवेदा उचथस्य नव्यः ।

5.012.03c वेदा मे देव ऋतुपा ऋतूनां नाहं पतिं सनितुरस्य रायः ॥

5.012.04a के ते अग्ने रिपवे बन्धनासः के पायवः सनिषन्त द्युमन्तः ।

5.012.04c के धासिमग्ने अनृतस्य पान्ति क आसतो वचसः सन्ति गोपाः ॥

5.012.05a सखायस्ते विषुणा अग्न एते शिवासः सन्तो अशिवा अभूवन् ।

5.012.05c अधूर्षत स्वयमेते वचोभिरृजूयते वृजिनानि ब्रुवन्तः ॥

5.012.06a यस्ते अग्ने नमसा यज्ञमीट्ट ऋतं स पात्यरुषस्य वृष्णः ।

5.012.06c तस्य क्षयः पृथुरा साधुरेतु प्रसर्स्राणस्य नहुषस्य शेषः ॥

5.013.01a अर्चन्तस्त्वा हवामहेऽर्चन्तः समिधीमहि ।

5.013.01c अग्ने अर्चन्त ऊतये ॥

5.013.02a अग्ने स्तोमं मनामहे सिध्रमद्य दिविस्पृशः ।

5.013.02c देवस्य द्रविणस्यवः ॥

5.013.03a अग्निर्जुषत नो गिरो होता यो मानुषेष्वा ।

5.013.03c स यक्षद्दैव्यं जनम् ॥

5.013.04a त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः ।

5.013.04c त्वया यज्ञं वि तन्वते ॥

5.013.05a त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम् ।

5.013.05c स नो रास्व सुवीर्यम् ॥

5.013.06a अग्ने नेमिरराँ इव देवाँस्त्वं परिभूरसि ।

5.013.06c आ राधश्चित्रमृञ्जसे ॥

5.014.01a अग्निं स्तोमेन बोधय समिधानो अमर्त्यम् ।

5.014.01c हव्या देवेषु नो दधत् ॥

5.014.02a तमध्वरेष्वीळते देवं मर्ता अमर्त्यम् ।

5.014.02c यजिष्ठं मानुषे जने ॥

5.014.03a तं हि शश्वन्त ईळते स्रुचा देवं घृतश्चुता ।

5.014.03c अग्निं हव्याय वोळ्हवे ॥

5.014.04a अग्निर्जातो अरोचत घ्नन्दस्यूञ्ज्योतिषा तमः ।

5.014.04c अविन्दद्गा अपः स्वः ॥

5.014.05a अग्निमीळेन्यं कविं घृतपृष्ठं सपर्यत ।

5.014.05c वेतु मे शृणवद्धवम् ॥

5.014.06a अग्निं घृतेन वावृधु स्तोमेभिर्विश्वचर्षणिम् ।

5.014.06c स्वाधीभिर्वचस्युभिः ॥

5.015.01a प्र वेधसे कवये वेद्याय गिरं भरे यशसे पूर्व्याय ।

5.015.01c घृतप्रसत्तो असुरः सुशेवो रायो धर्ता धरुणो वस्वो अग्निः ॥

5.015.02a ऋतेन ऋतं धरुणं धारयन्त यज्ञस्य शाके परमे व्योमन् ।

5.015.02c दिवो धर्मन्धरुणे सेदुषो नॄञ्जातैरजाताँ अभि ये ननक्षुः ॥

5.015.03a अङ्होयुवस्तन्वस्तन्वते वि वयो महद्दुष्टरं पूर्व्याय ।

5.015.03c स संवतो नवजातस्तुतुर्यात्सिङ्हं न क्रुद्धमभितः परि ष्ठुः ॥

5.015.04a मातेव यद्भरसे पप्रथानो जनंजनं धायसे चक्षसे च ।

5.015.04c वयोवयो जरसे यद्दधानः परि त्मना विषुरूपो जिगासि ॥

5.015.05a वाजो नु ते शवसस्पात्वन्तमुरुं दोघं धरुणं देव रायः ।

5.015.05c पदं न तायुर्गुहा दधानो महो राये चितयन्नत्रिमस्पः ॥

5.016.01a बृहद्वयो हि भानवेऽर्चा देवायाग्नये ।

5.016.01c यं मित्रं न प्रशस्तिभिर्मर्तासो दधिरे पुरः ॥

5.016.02a स हि द्युभिर्जनानां होता दक्षस्य बाह्वोः ।

5.016.02c वि हव्यमग्निरानुषग्भगो न वारमृण्वति ॥

5.016.03a अस्य स्तोमे मघोनः सख्ये वृद्धशोचिषः ।

5.016.03c विश्वा यस्मिन्तुविष्वणि समर्ये शुष्ममादधुः ॥

5.016.04a अधा ह्यग्न एषां सुवीर्यस्य मंहना ।

5.016.04c तमिद्यह्वं न रोदसी परि श्रवो बभूवतुः ॥

5.016.05a नू न एहि वार्यमग्ने गृणान आ भर ।

5.016.05c ये वयं ये च सूरयः स्वस्ति धामहे सचोतैधि पृत्सु नो वृधे ॥

5.017.01a आ यज्ञैर्देव मर्त्य इत्था तव्यांसमूतये ।

5.017.01c अग्निं कृते स्वध्वरे पूरुरीळीतावसे ॥

5.017.02a अस्य हि स्वयशस्तर आसा विधर्मन्मन्यसे ।

5.017.02c तं नाकं चित्रशोचिषं मन्द्रं परो मनीषया ॥

5.017.03a अस्य वासा उ अर्चिषा य आयुक्त तुजा गिरा ।

5.017.03c दिवो न यस्य रेतसा बृहच्छोचन्त्यर्चयः ॥

5.017.04a अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ ।

5.017.04c अधा विश्वासु हव्योऽग्निर्विक्षु प्र शस्यते ॥

5.017.05a नू न इद्धि वार्यमासा सचन्त सूरयः ।

5.017.05c ऊर्जो नपादभिष्टये पाहि शग्धि स्वस्तय उतैधि पृत्सु नो वृधे ॥

5.018.01a प्रातरग्निः पुरुप्रियो विश स्तवेतातिथिः ।

5.018.01c विश्वानि यो अमर्त्यो हव्या मर्तेषु रण्यति ॥

5.018.02a द्विताय मृक्तवाहसे स्वस्य दक्षस्य मंहना ।

5.018.02c इन्दुं स धत्त आनुषक्स्तोता चित्ते अमर्त्य ॥

5.018.03a तं वो दीर्घायुशोचिषं गिरा हुवे मघोनाम् ।

5.018.03c अरिष्टो येषां रथो व्यश्वदावन्नीयते ॥

5.018.04a चित्रा वा येषु दीधितिरासन्नुक्था पान्ति ये ।

5.018.04b स्तीर्णं बर्हिः स्वर्णरे श्रवांसि दधिरे परि ॥

5.018.05a ये मे पञ्चाशतं ददुरश्वानां सधस्तुति ।

5.018.05b द्युमदग्ने महि श्रवो बृहत्कृधि मघोनां नृवदमृत नृणाम् ॥

5.019.01a अभ्यवस्थाः प्र जायन्ते प्र वव्रेर्वव्रिश्चिकेत ।

5.019.01c उपस्थे मातुर्वि चष्टे ॥

5.019.02a जुहुरे वि चितयन्तोऽनिमिषं नृम्णं पान्ति ।

5.019.02c आ दृळ्हां पुरं विविशुः ॥

5.019.03a आ श्वैत्रेयस्य जन्तवो द्युमद्वर्धन्त कृष्टयः ।

5.019.03b निष्कग्रीवो बृहदुक्थ एना मध्वा न वाजयुः ॥

5.019.04a प्रियं दुग्धं न काम्यमजामि जाम्योः सचा ।

5.019.04c घर्मो न वाजजठरोऽदब्धः शश्वतो दभः ॥

5.019.05a क्रीळन्नो रश्म आ भुवः सं भस्मना वायुना वेविदानः ।

5.019.05b ता अस्य सन्धृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्थाः ॥

5.020.01a यमग्ने वाजसातम त्वं चिन्मन्यसे रयिम् ।

5.020.01c तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम् ॥

5.020.02a ये अग्ने नेरयन्ति ते वृद्धा उग्रस्य शवसः ।

5.020.02b अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिरे ॥

5.020.03a होतारं त्वा वृणीमहेऽग्ने दक्षस्य साधनम् ।

5.020.03b यज्ञेषु पूर्व्यं गिरा प्रयस्वन्तो हवामहे ॥

5.020.04a इत्था यथा त ऊतये सहसावन्दिवेदिवे ।

5.020.04b राय ऋताय सुक्रतो गोभिः ष्याम सधमादो वीरैः स्याम सधमादः ॥

5.021.01a मनुष्वत्त्वा नि धीमहि मनुष्वत्समिधीमहि ।
5.021.01c अग्ने मनुष्वदङ्गिरो देवान्देवयते यज ॥
5.021.02a त्वं हि मानुषे जनेऽग्ने सुप्रीत इध्यसे ।
5.021.02c स्रुचस्त्वा यन्त्यानुषक्सुजात सर्पिरासुते ॥
5.021.03a त्वां विश्वे सजोषसो देवासो दूतमक्रत ।
5.021.03b सपर्यन्तस्त्वा कवे यज्ञेषु देवमीळते ॥
5.021.04a देवं वो देवयज्ययाग्निमीळीत मर्त्यः ।
5.021.04b समिद्धः शुक्र दीदिह्यृतस्य योनिमासदः ससस्य योनिमासदः ॥

5.022.01a प्र विश्वसामन्नत्रिवदर्चा पावकशोचिषे ।
5.022.01c यो अध्वरेष्वीड्यो होता मन्द्रतमो विशि ॥
5.022.02a न्यग्निं जातवेदसं दधाता देवमृत्विजम् ।
5.022.02c प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः ॥
5.022.03a चिकित्विन्मनसं त्वा देवं मर्तास ऊतये ।
5.022.03c वरेण्यस्य तेऽवस इयानासो अमन्महि ॥
5.022.04a अग्ने चिकिद्ध्यस्य न इदं वचः सहस्य ।

5.022.04c तं त्वा सुशिप्र दम्पते स्तोमैर्वर्धन्त्यत्रयो गीर्भिः शुम्भन्त्यत्रयः ॥

5.023.01a अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम् ।

5.023.01c विश्वा यश्चर्षणीरभ्या३सा वाजेषु सासहत् ॥

5.023.02a तमग्ने पृतनाषहं रयिं सहस्व आ भर ।

5.023.02b त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः ॥

5.023.03a विश्वे हि त्वा सजोषसो जनासो वृक्तबर्हिषः ।

5.023.03c होतारं सद्मसु प्रियं व्यन्ति वार्या पुरु ॥

5.023.04a स हि ष्मा विश्वचर्षणिरभिमाति सहो दधे ।

5.023.04b अग्न एषु क्षयेष्वा रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ॥

5.024.01a अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ॥

5.024.02a वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ॥

5.024.03a स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात् ॥

5.024.04a तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥

5.025.01a अच्छा वो अग्निमवसे देवं गासि स नो वसुः ।

5.025.01c रासत्पुत्र ऋषूणामृतावा पर्षति द्विषः ॥

5.025.02a स हि सत्यो यं पूर्वे चिद्देवासश्चिद्यमीधिरे ।

5.025.02c होतारं मन्द्रजिह्वमित्सुदीतिभिर्विभावसुम् ॥

5.025.03a स नो धीती वरिष्ठया श्रेष्ठया च सुमत्या ।

5.025.03c अग्ने रायो दिदीहि नः सुवृक्तिभिर्वरेण्य ॥

5.025.04a अग्निर्देवेषु राजत्यग्निर्मर्तेष्वाविशन् ।

5.025.04c अग्निर्नो हव्यवाहनोऽग्निं धीभिः सपर्यत ॥

5.025.05a अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम् ।

5.025.05c अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥

5.025.06a अग्निर्ददाति सत्पतिं सासाह यो युधा नृभिः ।

5.025.06c अग्निरत्यं रघुष्यदं जेतारमपराजितम् ॥

5.025.07a यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ।

5.025.07c महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥

5.025.08a तव द्युमन्तो अर्चयो ग्रावेवोच्यते बृहत् ।

5.025.08c उतो ते तन्यतुर्यथा स्वानो अर्त त्मना दिवः ॥

5.025.09a एवाँ अग्निं वसूयवः सहसानं ववन्दिम ।

5.025.09c स नो विश्वा अति द्विषः पर्षन्नावेव सुक्रतुः ॥

5.026.01a अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।

5.026.01c आ देवान्वक्षि यक्षि च ॥

5.026.02a तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम् ।

5.026.02c देवाँ आ वीतये वह ॥

5.026.03a वीतिहोत्रं त्वा कवे द्युमन्तं समिधीमहि ।

5.026.03c अग्ने बृहन्तमध्वरे ॥

5.026.04a अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये ।

5.026.04b होतारं त्वा वृणीमहे ॥

5.026.05a यजमानाय सुन्वत आग्ने सुवीर्यं वह ।

5.026.05c देवैरा सत्सि बर्हिषि ॥

5.026.06a समिधानः सहस्रजिदग्ने धर्माणि पुष्यसि ।

5.026.06c देवानां दूत उक्थ्यः ॥

5.026.07a न्यग्निं जातवेदसं होत्रवाहं यविष्ठ्यम् ।

5.026.07c दधाता देवमृत्विजम् ॥

5.026.08a प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः ।

5.026.08c स्तृणीत बर्हिरासदे ॥

5.026.09a एदं मरुतो अश्विना मित्रः सीदन्तु वरुणः ।

5.026.09c देवासः सर्वया विशा ॥

5.027.01a अनस्वन्ता सत्पतिर्मामहे मे गावा चेतिष्ठो असुरो मघोनः ।

5.027.01c त्रैवृष्णो अग्ने दशभिः सहस्रैर्वैश्वानर त्र्यरुणश्चिकेत ॥

5.027.02a यो मे शता च विंशतिं च गोनां हरी च युक्ता सुधुरा ददाति ।

5.027.02c वैश्वानर सुष्टुतो वावृधानोऽग्ने यच्छ त्र्यरुणाय शर्म ॥

5.027.03a एवा ते अग्ने सुमतिं चकानो नविष्ठाय नवमं त्रसदस्युः ।

5.027.03c यो मे गिरस्तुविजातस्य पूर्वीर्युक्तेनाभि त्र्यरुणो गृणाति ॥

5.027.04a यो म इति प्रवोचत्यश्वमेधाय सूरये ।

5.027.04b दददृचा सनिं यते ददन्मेधामृतायते ॥

5.027.05a यस्य मा परुषाः शतमुद्धर्षयन्त्युक्षणः ।

5.027.05c अश्वमेधस्य दानाः सोमा इव त्र्याशिरः ॥

5.027.06a इन्द्राग्नी शतदाव्न्यश्वमेधे सुवीर्यम् ।

5.027.06c क्षत्रं धारयतं बृहद्दिवि सूर्यमिवाजरम् ॥

5.028.01a समिद्धो अग्निर्दिवि शोचिरश्रेत्प्रत्यङ्ङुषसमुर्विया वि भाति ।

5.028.01c एति प्राची विश्ववारा नमोभिर्देवाँ ईळाना हविषा घृताची ॥

5.028.02a समिध्यमानो अमृतस्य राजसि हविष्कृण्वन्तं सचसे स्वस्तये ।

5.028.02c विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने नि च धत्त इत्पुरः ॥

5.028.03a अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।

5.028.03c सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ॥

5.028.04a समिद्धस्य प्रमहसोऽग्ने वन्दे तव श्रियम् ।

5.028.04c वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे ॥

5.028.05a समिद्धो अग्न आहुत देवान्यक्षि स्वध्वर ।

5.028.05c त्वं हि हव्यवाळसि ॥

5.028.06a आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे ।

5.028.06c वृणीध्वं हव्यवाहनम् ॥

5.029.01a त्र्यर्यमा मनुषो देवताता त्री रोचना दिव्या धारयन्त ।

5.029.01c अर्चन्ति त्वा मरुतः पूतदक्षास्त्वमेषामृषिरिन्द्रासि धीरः ॥

5.029.02a अनु यदीं मरुतो मन्दसानमार्चन्निन्द्रं पपिवांसं सुतस्य ।

5.029.02c आदत्त वज्रमभि यदहिं हन्नपो यह्वीरसृजत्सर्तवा उ ॥

5.029.03a उत ब्रह्माणो मरुतो मे अस्येन्द्रः सोमस्य सुषुतस्य पेयाः ।

5.029.03c तद्धि हव्यं मनुषे गा अविन्ददहन्नहिं पपिवाँ इन्द्रो अस्य ॥

5.029.04a आद्रोदसी वितरं वि ष्कभायत्संविव्यानश्चिद्भियसे मृगं कः ।

5.029.04c जिगर्तिमिन्द्रो अपजर्गुराणः प्रति श्वसन्तमव दानवं हन् ॥

5.029.05a अध क्रत्वा मघवन्तुभ्यं देवा अनु विश्वे अददुः सोमपेयम् ।

5.029.05c यत्सूर्यस्य हरितः पतन्तीः पुरः सतीरुपरा एतशे कः ॥

5.029.06a नव यदस्य नवतिं च भोगान्साकं वज्रेण मघवा विवृश्चत्।

5.029.06c अर्चन्तीन्द्रं मरुतः सधस्थे त्रैष्टुभेन वचसा बाधत द्याम्॥

5.029.07a सखा सख्ये अपचत्तूयमग्निरस्य क्रत्वा महिषा त्री शतानि।

5.029.07c त्री साकमिन्द्रो मनुषः सरांसि सुतं पिबद्वृत्रहत्याय सोमम्॥

5.029.08a त्री यच्छता महिषाणामघो मास्त्री सरांसि मघवा सोम्यापाः।

5.029.08c कारं न विश्वे अह्वन्त देवा भरमिन्द्राय यदहिं जघान॥

5.029.09a उशना यत्सहस्यै३रयातं गृहमिन्द्र जूजुवानेभिरश्वैः।

5.029.09c वन्वानो अत्र सरथं ययाथ कुत्सेन देवैरवनोर्ह शुष्णम्॥

5.029.10a प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्यद्वरिवो यातवेऽकः।

5.029.10c अनासो दस्यूँरमृणो वधेन नि दुर्योण आवृणङ्मृध्रवाचः॥

5.029.11a स्तोमासस्त्वा गौरिवीतेरवर्धन्नरन्धयो वैदथिनाय पिप्रुम्।

5.029.11c आ त्वामृजिश्वा सख्याय चक्रे पचन्पक्तीरपिबः सोममस्य॥

5.029.12a नवग्वासः सुतसोमास इन्द्रं दशग्वासो अभ्यर्चन्त्यर्कैः।

5.029.12c गव्यं चिदूर्वमपिधानवन्तं तं चिन्नरः शशमाना अप व्रन्॥

5.029.13a कथो नु ते परि चराणि विद्वान्वीर्या मघवन्या चकर्थ।

5.029.13c या चो नु नव्या कृणवः शविष्ठ प्रेदु ता ते विदथेषु ब्रवाम॥

5.029.14a एता विश्वा चकृवाँ इन्द्र भूर्यपरीतो जनुषा वीर्येण।

5.029.14c या चिन्नु वज्रिन्कृणवो दधृष्वान्न ते वर्ता तविष्या अस्ति तस्याः॥

5.029.15a इन्द्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म ।

5.029.15c वस्त्रेव भद्रा सुकृता वसूयू रथं न धीरः स्वपा अतक्षम् ॥

5.030.01a क्व१ स्य वीरः को अपश्यदिन्द्रं सुखरथमीयमानं हरिभ्याम् ।

5.030.01c यो राया वज्री सुतसोममिच्छन्तदोको गन्ता पुरुहूत ऊती ॥

5.030.02a अवाचचक्षं पदमस्य सस्वरुग्रं निधातुरन्वायमिच्छन् ।

5.030.02c अपृच्छमन्याँ उत ते म आहुरिन्द्रं नरो बुबुधाना अशेम ॥

5.030.03a प्र नु वयं सुते या ते कृतानीन्द्र ब्रवाम यानि नो जुजोषः ।

5.030.03b वेददविद्वाञ्छृणवच्च विद्वान्वहतेऽयं मघवा सर्वसेनः ॥

5.030.04a स्थिरं मनश्चकृषे जात इन्द्र वेषीदेको युधये भूयसश्चित् ।

5.030.04b अश्मानं चिच्छवसा दिद्युतो वि विदो गवामूर्वमुस्रियाणाम् ॥

5.030.05a परो यत्त्वं परम आजनिष्ठाः परावति श्रुत्यं नाम बिभ्रत् ।

5.030.05c अतश्चिदिन्द्रादभयन्त देवा विश्वा अपो अजयद्दासपत्नीः ॥

5.030.06a तुभ्येदेते मरुतः सुशेवा अर्चन्त्यर्कं सुन्वन्त्यन्धः ।

5.030.06c अहिमोहानमप आशयानं प्र मायाभिर्मायिनं सक्षदिन्द्रः ॥

5.030.07a वि षू मृधो जनुषा दानमिन्वन्नहन्गवा मघवन्संचकानः ।

5.030.07c अत्रा दासस्य नमुचेः शिरो यदवर्तयो मनवे गातुमिच्छन् ॥

5.030.08a युजं हि मामकृथा आदिदिन्द्र शिरो दासस्य नमुचेर्मथायन् ।

5.030.08c अश्मानं चित्स्वर्यं१ वर्तमानं प्र चक्रियेव रोदसी मरुद्भ्यः ॥

5.030.09a स्त्रियो हि दास आयुधानि चक्रे किं मा करन्नबला अस्य सेनाः ।

5.030.09c अन्तर्ह्यख्यदुभे अस्य धेने अथोप प्रैद्युधये दस्युमिन्द्रः ॥

5.030.10a समत्र गावोऽभितोऽनवन्तेहेह वत्सैर्वियुता यदासन् ।

5.030.10c सं ता इन्द्रो असृजदस्य शाकैर्यदीं सोमासः सुषुता अमन्दन् ॥

5.030.11a यदीं सोमा बभ्रुधूता अमन्दन्नरोरवीद्वृषभः सादनेषु ।

5.030.11c पुरंदरः पपिवाँ इन्द्रो अस्य पुनर्गवामददादुस्रियाणाम् ॥

5.030.12a भद्रमिदं रुशमा अग्ने अक्रन्गावां चत्वारि ददतः सहस्रा ।

5.030.12c ऋणंचयस्य प्रयता मघानि प्रत्यग्रभीष्म नृतमस्य नृणाम् ॥

5.030.13a सुपेशसं माव सृजन्त्यस्तं गवां सहस्रै रुशमासो अग्ने ।

5.030.13c तीव्रा इन्द्रमममन्दुः सुतासोऽक्तोर्व्युष्टौ परितक्म्यायाः ॥

5.030.14a औच्छत्सा रात्री परितक्म्या याँ ऋणंचये राजनि रुशमानाम् ।

5.030.14c अत्यो न वाजी रघुरज्यमानो बभ्रुश्चत्वार्यसनत्सहस्रा ॥

5.030.15a चतुःसहस्रं गव्यस्य पश्वः प्रत्यग्रभीष्म रुशमेष्वग्ने ।

5.030.15c घर्मश्चित्तप्तः प्रवृजे य आसीदयस्मयस्तम्वादाम विप्राः ॥

5.031.01a इन्द्रो रथाय प्रवतं कृणोति यमध्यस्थान्मघवा वाजयन्तम् ।

5.031.01c यूथेव पश्वो व्युनोति गोपा अरिष्टो याति प्रथमः सिषासन् ॥

5.031.02a आ प्र द्रव हरिवो मा वि वेनः पिशङ्गराते अभि नः सचस्व ।

5.031.02c नहि त्वदिन्द्र वस्यो अन्यदस्त्यमेनाँश्चिज्जनिवतश्चकर्थ ॥

5.031.03a उद्यत्सहः सहस आजनिष्ट देदिष्ट इन्द्र इन्द्रियाणि विश्वा ।

5.031.03c प्राचोदयत्सुदुघा वव्रे अन्तर्वि ज्योतिषा संववृत्वत्तमोऽवः ॥

5.031.04a अनवस्ते रथमश्वाय तक्षन्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ।

5.031.04c ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ ॥

5.031.05a वृष्णे यत्ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदितिः सजोषाः ।

5.031.05c अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून् ॥

5.031.06a प्र ते पूर्वाणि करणानि वोचं प्र नूतना मघवन्या चकर्थ ।

5.031.06c शक्तीवो यद्विभरा रोदसी उभे जयन्नपो मनवे दानुचित्राः ॥

5.031.07a तदिन्नु ते करणं दस्म विप्राहिं यद्घ्नन्नोजो अत्रामिमीथाः ।

5.031.07c शुष्णस्य चित्परि माया अगृभ्णाः प्रपित्वं यन्नप दस्यूँरसेधः ॥

5.031.08a त्वमपो यदवे तुर्वशायारमयः सुदुघाः पार इन्द्र ।

5.031.08c उग्रमयातमवहो ह कुत्सं सं ह यद्वामुशनारन्त देवाः ॥

5.031.09a इन्द्राकुत्सा वहमाना रथेना वामत्या अपि कर्णे वहन्तु ।

5.031.09c निः षीमद्भ्यो धमथो निः षधस्थान्मघोनो हृदो वरथस्तमांसि ॥

5.031.10a वातस्य युक्तान्सुयुजश्चिदश्वान्कविश्चिदेषो अजगन्नवस्युः ।

5.031.10c विश्वे ते अत्र मरुतः सखाय इन्द्र ब्रह्माणि तविषीमवर्धन् ॥

5.031.11a सूरश्चिद्रथं परितक्म्यायां पूर्वं करदुपरं जूजुवांसम् ।

5.031.11c भरच्चक्रमेतशः सं रिणाति पुरो दधत्सनिष्यति क्रतुं नः ॥

5.031.12a आयं जना अभिचक्षे जगामेन्द्रः सखायं सुतसोममिच्छन् ।

5.031.12c वदन्ग्रावाव वेदिं भ्रियाते यस्य जीरमध्वर्यवश्चरन्ति ॥

5.031.13a ये चाकनन्त चाकनन्त नू ते मर्ता अमृत मो ते अंह आरन् ।

5.031.13c वावन्धि यज्यूँरुत तेषु धेह्योजो जनेषु येषु ते स्याम ॥

5.032.01a अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरम्णाः ।

5.032.01c महान्तमिन्द्र पर्वतं वि यद्वः सृजो वि धारा अव दानवं हन् ॥

5.032.02a त्वमुत्साँ ऋतुभिर्बद्बधानाँ अरंह ऊधः पर्वतस्य वज्रिन् ।

5.032.02c अहिं चिदुग्र प्रयुतं शयानं जघन्वाँ इन्द्र तविषीमधत्थाः ॥

5.032.03a त्यस्य चिन्महतो निर्मृगस्य वधर्जघान तविषीभिरिन्द्रः ।

5.032.03c य एक इदप्रतिर्मन्यमान आदस्मादन्यो अजनिष्ट तव्यान् ॥

5.032.04a त्यं चिदेषां स्वधया मदन्तं मिहो नपातं सुवृधं तमोगाम् ।

5.032.04c वृषप्रभर्मा दानवस्य भामं वज्रेण वज्री नि जघान शुष्णम् ॥

5.032.05a त्यं चिदस्य क्रतुभिर्निषत्तममर्मणो विददिदस्य मर्म ।

5.032.05c यदीं सुक्षत्र प्रभृता मदस्य युयुत्सन्तं तमसि हर्म्ये धाः ॥

5.032.06a त्यं चिदित्था कत्पयं शयानमसूर्ये तमसि वावृधानम् ।

5.032.06c तं चिन्मन्दानो वृषभः सुतस्योच्चैरिन्द्रो अपगूर्या जघान ॥

5.032.07a उद्यदिन्द्रो महते दानवाय वधर्यमिष्ट सहो अप्रतीतम् ।

5.032.07c यदीं वज्रस्य प्रभृतौ ददाभ विश्वस्य जन्तोरधमं चकार ॥

5.032.08a त्यं चिदर्णं मधुपं शयानमसिन्वं वव्रं मह्याददुग्रः ।

5.032.08c अपादमत्रं महता वधेन नि दुर्योण आवृणङ्मृध्रवाचम् ॥

5.032.09a को अस्य शुष्मं तविषीं वरात एको धना भरते अप्रतीतः ।

5.032.09c इमे चिदस्य ज्रयसो नु देवी इन्द्रस्यौजसो भियसा जिहाते ॥

5.032.10a न्यस्मै देवी स्वधितिर्जिहीत इन्द्राय गातुरुशतीव येमे ।

5.032.10c सं यदोजो युवते विश्वमाभिरनु स्वधाव्ने क्षितयो नमन्त ॥

5.032.11a एकं नु त्वा सत्पतिं पाञ्चजन्यं जातं शृणोमि यशसं जनेषु ।

5.032.11c तं मे जगृभ्र आशसो नविष्ठं दोषा वस्तोर्हवमानास इन्द्रम् ॥

5.032.12a एवा हि त्वामृतुथा यातयन्तं मघा विप्रेभ्यो ददतं शृणोमि ।

5.032.12c किं ते ब्रह्माणो गृहते सखायो ये त्वाया निदधुः काममिन्द्र ॥

5.033.01a महि महे तवसे दीध्ये नॄनिन्द्रायेत्था तवसे अतव्यान् ।

5.033.01c यो अस्मै सुमतिं वाजसातौ स्तुतो जने समर्यश्चिकेत ॥

5.033.02a स त्वं न इन्द्र धियसानो अर्कैर्हरीणां वृषन्योक्त्रमश्रेः ।

5.033.02c या इत्था मघवन्ननु जोषं वक्षो अभि प्रार्यः सक्षि जनान् ॥

5.033.03a न ते त इन्द्राभ्य१स्मदृष्वायुक्तासो अब्रह्मता यदसन्।

5.033.03c तिष्ठा रथमधि तं वज्रहस्ता रश्मिं देव यमसे स्वश्वः॥

5.033.04a पुरू यत्त इन्द्र सन्त्युक्था गवे चकर्थोर्वरासु युध्यन्।

5.033.04c ततक्षे सूर्याय चिदोकसि स्वे वृषा समत्सु दासस्य नाम चित्॥

5.033.05a वयं ते त इन्द्र ये च नरः शर्धो जज्ञाना याताश्च रथाः।

5.033.05c आस्माञ्जगम्यादहिशुष्म सत्वा भगो न हव्यः प्रभृथेषु चारुः॥

5.033.06a पपृक्षेण्यमिन्द्र त्वे ह्योजो नृम्णानि च नृतमानो अमर्तः।

5.033.06c स न एनीं वसवानो रयिं दाः प्रार्य स्तुषे तुविमघस्य दानम्॥

5.033.07a एवा न इन्द्रोतिभिरव पाहि गृणतः शूर कारून्।

5.033.07c उत त्वचं ददतो वाजसातौ पिप्रीहि मध्वः सुषुतस्य चारोः॥

5.033.08a उत त्ये मा पौरुकुत्स्यस्य सूरेस्त्रसदस्योर्हिरणिनो रराणाः।

5.033.08c वहन्तु मा दश श्येतासो अस्य गैरिक्षितस्य क्रतुभिर्नु सश्चे॥

5.033.09a उत त्ये मा मारुताश्वस्य शोणाः क्रत्वामघासो विदथस्य रातौ।

5.033.09c सहस्रा मे च्यवतानो ददान आनूकमर्यो वपुषे नार्चत्॥

5.033.10a उत त्ये मा ध्वन्यस्य जुष्टा लक्ष्मण्यस्य सुरुचो यतानाः।

5.033.10c मह्ना रायः संवरणस्य ऋषेर्व्रजं न गावः प्रयता अपि ग्मन्॥

5.034.01a अजातशत्रुमजरा स्वर्वत्यनु स्वधामिता दस्ममीयते।

5.034.01c सुनोतन पचत ब्रह्मवाहसे पुरुष्टुताय प्रतरं दधातन ॥

5.034.02a आ यः सोमेन जठरमपिप्रतामन्दत मघवा मध्वो अन्धसः ।

5.034.02c यदीं मृगाय हन्तवे महावधः सहस्रभृष्टिमुशना वधं यमत् ॥

5.034.03a यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह ।

5.034.03c अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः ॥

5.034.04a यस्यावधीत्पितरं यस्य मातरं यस्य शक्रो भ्रातरं नात ईषते ।

5.034.04c वेतीद्वस्य प्रयता यतंकरो न किल्बिषादीषते वस्व आकरः ॥

5.034.05a न पञ्चभिर्दशभिर्वष्ट्यारभं नासुन्वता सचते पुष्यता चन ।

5.034.05c जिनाति वेदमुया हन्ति वा धुनिरा देवयुं भजति गोमति व्रजे ॥

5.034.06a वित्वक्षणः समृतौ चक्रमासजोऽसुन्वतो विषुणः सुन्वतो वृधः ।

5.034.06c इन्द्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासमार्यः ॥

5.034.07a समीं पणेरजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु ।

5.034.07c दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत् ॥

5.034.08a सं यज्ञनौ सुधनौ विश्वशर्धसाववेदिन्द्रो मघवा गोषु शुभ्रिषु ।

5.034.08c युजं ह्य१न्यमकृत प्रवेपन्युदीं गव्यं सृजते सत्वभिर्धुनिः ॥

5.034.09a सहस्रसामाग्निवेशिं गृणीषे शत्रिमग्न उपमां केतुमर्यः ।

5.034.09c तस्मा आपः संयतः पीपयन्त तस्मिन्क्षत्रममवत्त्वेषमस्तु ॥

5.035.01a यस्ते साधिष्ठोऽवस इन्द्र क्रतुष्टमा भर।

5.035.01c अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरम्॥

5.035.02a यदिन्द्र ते चतस्रो यच्छूर सन्ति तिस्रः।

5.035.02c यद्वा पञ्च क्षितीनामवस्तत्सु न आ भर॥

5.035.03a आ तेऽवो वरेण्यं वृषन्तमस्य हूमहे।

5.035.03c वृषजूतिर्हि जज्ञिष आभूभिरिन्द्र तुर्वणिः॥

5.035.04a वृषा ह्यसि राधसे जज्ञिषे वृष्णि ते शवः।

5.035.04c स्वक्षत्रं ते धृषन्मनः सत्राहमिन्द्र पौंस्यम्॥

5.035.05a त्वं तमिन्द्र मर्त्यममित्रयन्तमद्रिवः।

5.035.05c सर्वरथा शतक्रतो नि याहि शवसस्पते॥

5.035.06a त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः।

5.035.06c उग्रं पूर्वीषु पूर्व्यं हवन्ते वाजसातये॥

5.035.07a अस्माकमिन्द्र दुष्टरं पुरोयावानमाजिषु।

5.035.07c सयावानं धनेधने वाजयन्तमवा रथम्॥

5.035.08a अस्माकमिन्द्रेहि नो रथमवा पुरंध्या।

5.035.08c वयं शविष्ठ वार्यं दिवि श्रवो दधीमहि दिवि स्तोमं मनामहे॥

5.036.01a स आ गमदिन्द्रो यो वसूनां चिकेतद्दातुं दामनो रयीणाम्।

5.036.01c धन्वचरो न वंसगस्तृषाणश्चकमानः पिबतु दुग्धमंशुम् ॥

5.036.02a आ ते हनू हरिवः शूर शिप्रे रुहत्सोमो न पर्वतस्य पृष्ठे ।

5.036.02c अनु त्वा राजन्नर्वतो न हिन्वन्गीर्भिर्मदेम पुरुहूत विश्वे ॥

5.036.03a चक्रं न वृत्तं पुरुहूत वेपते मनो भिया मे अमतेरिदद्रिवः ।

5.036.03c रथादधि त्वा जरिता सदावृध कुविन्नु स्तोषन्मघवन्पुरूवसुः ॥

5.036.04a एष ग्रावेव जरिता त इन्द्रेयर्ति वाचं बृहदाशुषाणः ।

5.036.04c प्र सव्येन मघवन्यंसि रायः प्र दक्षिणिद्धरिवो मा वि वेनः ॥

5.036.05a वृषा त्वा वृषणं वर्धतु द्यौर्वृषा वृषभ्यां वहसे हरिभ्याम् ।

5.036.05c स नो वृषा वृषरथः सुशिप्र वृषक्रतो वृषा वज्रिन्भरे धाः ॥

5.036.06a यो रोहितौ वाजिनौ वाजिनीवान्त्रिभिः शतैः सचमानावदिष्ट ।

5.036.06c यूने समस्मै क्षितयो नमन्तां श्रुतरथाय मरुतो दुवोया ॥

5.037.01a सं भानुना यतते सूर्यस्याजुह्वानो घृतपृष्ठः स्वञ्चाः ।

5.037.01c तस्मा अमृध्रा उषसो व्युच्छान्य इन्द्राय सुनवामेत्याह ॥

5.037.02a समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावा सुतसोमो जराते ।

5.037.02c ग्रावाणो यस्येषिरं वदन्त्ययदध्वर्युर्हविषाव सिन्धुम् ॥

5.037.03a वधूरियं पतिमिच्छन्त्येति य ईं वहाते महिषीमिषिराम् ।

5.037.03c आस्य श्रवस्याद्रथ आ च घोषात्पुरू सहस्रा परि वर्तयाते ॥

5.037.04a न स राजा व्यथते यस्मिन्निन्द्रस्तीव्रं सोमं पिबति गोसखायम् ।

5.037.04c आ सत्वनैरजति हन्ति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन् ॥

5.037.05a पुष्यात्क्षेमे अभि योगे भवात्युभे वृतौ संयती सं जयाति ।

5.037.05c प्रियः सूर्ये प्रियो अग्ना भवाति य इन्द्राय सुतसोमो ददाशत् ॥

5.038.01a उरोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो ।

5.038.01c अधा नो विश्वचर्षणे द्युम्ना सुक्षत्र मंहय ॥

5.038.02a यदीमिन्द्र श्रवाय्यमिषं शविष्ठ दधिषे ।

5.038.02c पप्रथे दीर्घश्रुत्तमं हिरण्यवर्ण दुष्टरम् ॥

5.038.03a शुष्मासो ये ते अद्रिवो मेहना केतसापः ।

5.038.03c उभा देवावभिष्टये दिवश्च ग्मश्च राजथः ॥

5.038.04a उतो नो अस्य कस्य चिद्दक्षस्य तव वृत्रहन् ।

5.038.04c अस्मभ्यं नृम्णमा भरास्मभ्यं नृमणस्यसे ॥

5.038.05a नू त आभिरभिष्टिभिस्तव शर्मञ्छतक्रतो ।

5.038.05c इन्द्र स्याम सुगोपाः शूर स्याम सुगोपाः ॥

5.039.01a यदिन्द्र चित्र मेहनास्ति त्वादातमद्रिवः ।

5.039.01c राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥

5.039.02a यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर ।

5.039.02c विद्याम तस्य ते वयमकूपारस्य दावने ॥

5.039.03a यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।

5.039.03c तेन दृळ्हा चिदद्रिव आ वाजं दर्षि सातये ॥

5.039.04a मंहिष्ठं वो मघोनां राजानं चर्षणीनाम् ।

5.039.04c इन्द्रमुप प्रशस्तये पूर्वीभिर्जुजुषे गिरः ॥

5.039.05a अस्मा इत्काव्यं वच उक्थमिन्द्राय शंस्यम् ।

5.039.05c तस्मा उ ब्रह्मवाहसे गिरो वर्धन्त्यत्रयो गिरः शुम्भन्त्यत्रयः ॥

5.040.01a आ याह्यद्रिभिः सुतं सोमं सोमपते पिब ।

5.040.01c वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥

5.040.02a वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः ।

5.040.02c वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥

5.040.03a वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः ।

5.040.03c वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥

5.040.04a ऋजीषी वज्री वृषभस्तुराषाट् छुष्मी राजा वृत्रहा सोमपावा ।

5.040.04c युक्त्वा हरिभ्यामुप यासदर्वाङ्माध्यंदिने सवने मत्सदिन्द्रः ॥

5.040.05a यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः ।

5.040.05c अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः ॥

5.040.06a स्वर्भानोरध यदिन्द्र माया अवो दिवो वर्तमाना अवाहन् ।

5.040.06c गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविन्ददत्रिः ॥

5.040.07a मा मामिमं तव सन्तमत्र इरस्या द्रुग्धो भियसा नि गारीत् ।

5.040.07c त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा ॥

5.040.08a ग्राव्णो ब्रह्मा युयुजानः सपर्यन्कीरिणा देवान्नमसोपशिक्षन् ।

5.040.08c अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरप माया अघुक्षत् ॥

5.040.09a यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः ।

5.040.09c अत्रयस्तमन्वविन्दन्नह्य१न्ये अशक्नुवन् ॥

5.041.01a को नु वां मित्रावरुणावृतायन्दिवो वा महः पार्थिवस्य वा दे ।

5.041.01c ऋतस्य वा सदसि त्रासीथां नो यज्ञायते वा पशुषो न वाजान् ॥

5.041.02a ते नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतो जुषन्त ।

5.041.02c नमोभिर्वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हुषे सजोषाः ॥

5.041.03a आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन्रथ्यस्य पुष्टौ ।

5.041.03c उत वा दिवो असुराय मन्म प्रान्धांसीव यज्यवे भरध्वम् ॥

5.041.04a प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः ।

5.041.04c पूषा भगः प्रभृथे विश्वभोजा आजिं न जग्मुराश्वश्वतमाः ॥

5.041.05a प्र वो रयिं युक्ताश्वं भरध्वं राय एषेऽवसे दधीत धीः ।

5.041.05c सुशेव एवैरौशिजस्य होता ये व एवा मरुतस्तुराणाम् ॥

5.041.06a प्र वो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनितारमर्कैः ।

5.041.06c इषुध्यव ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः ॥

5.041.07a उप व एषे वन्द्येभिः शूषैः प्र यह्वी दिवश्चितयद्भिरर्कैः ।

5.041.07c उषासानक्ता विदुषीव विश्वमा हा वहतो मर्त्याय यज्ञम् ॥

5.041.08a अभि वो अर्चे पोष्यावतो नॄन्वास्तोष्पतिं त्वष्टारं रराणः ।

5.041.08c धन्या सजोषा धिषणा नमोभिर्वनस्पतीँरोषधी राय एषे ॥

5.041.09a तुजे नस्तने पर्वताः सन्तु स्वैतवो ये वसवो न वीराः ।

5.041.09c पनित आप्त्यो यजतः सदा नो वर्धान्नः शंसं नर्यो अभिष्टौ ॥

5.041.10a वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातमपां सुवृक्ति ।

5.041.10c गृणीते अग्निरेतरी न शूषैः शोचिष्केशो नि रिणाति वना ॥

5.041.11a कथा महे रुद्रियाय ब्रवाम कद्राये चिकितुषे भगाय ।

5.041.11c आप ओषधीरुत नोऽवन्तु द्यौर्वना गिरयो वृक्षकेशाः ॥

5.041.12a शृणोतु न ऊर्जां पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा ।

5.041.12c शृण्वन्त्वापः पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः ॥

5.041.13a विदा चिन्नु महान्तो ये व एवा ब्रवाम दस्मा वार्यं दधानाः ।

5.041.13c वयश्चन सुभ्व१ आव यन्ति क्षुभा मर्तमनुयतं वधस्नैः ॥

5.041.14a आ दैव्यानि पार्थिवानि जन्मापश्चाच्छा सुमखाय वोचम् ।

5.041.14c वर्धन्तां द्यावो गिरश्चन्द्राग्रा उदा वर्धन्तामभिषाता अर्णाः ॥

5.041.15a पदेपदे मे जरिमा नि धायि वरूत्री वा शक्रा या पायुभिश्च ।

5.041.15c सिषक्तु माता मही रसा नः स्मत्सूरिभिरृजुहस्त ऋजुवनिः ॥

5.041.16a कथा दाशेम नमसा सुदानूनेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ ।

5.041.16c मा नोऽहिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः ॥

5.041.17a इति चिन्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ देवासो वनते मर्त्यो वः ।

5.041.17c अत्रा शिवां तन्वो धासिमस्या जरां चिन्मे निरृतिर्जग्रसीत ॥

5.041.18a तां वो देवाः सुमतिमूर्जयन्तीमिषमश्याम वसवः शसा गोः ।

5.041.18c सा नः सुदानुर्मृळयन्ती देवी प्रति द्रवन्ती सुविताय गम्याः ॥

5.041.19a अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु ।

5.041.19c उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः ॥

5.041.20a सिषक्तु न ऊर्जव्यस्य पुष्टेः ॥

5.042.01a प्र शंतमा वरुणं दीधिती गीर्मित्रं भगमदितिं नूनमश्याः ।

5.042.01c पृषद्योनिः पञ्चहोता शृणोत्वतूर्तपन्था असुरो मयोभुः ॥

5.042.02a प्रति मे स्तोममदितिर्जगृभ्यात्सूनुं न माता हृद्यं सुशेवम् ।

5.042.02c ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु ॥

5.042.03a उदीरय कवितमं कवीनामुनत्तैनमभि मध्वा घृतेन ।

5.042.03c स नो वसूनि प्रयता हितानि चन्द्राणि देवः सविता सुवाति ॥

5.042.04a समिन्द्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्ति ।

5.042.04c सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमत्या यज्ञियानाम् ॥

5.042.05a देवो भगः सविता रायो अंश इन्द्रो वृत्रस्य संजितो धनानाम् ।

5.042.05c ऋभुक्षा वाज उत वा पुरंधिरवन्तु नो अमृतासस्तुरासः ॥

5.042.06a मरुत्वतो अप्रतीतस्य जिष्णोरजूर्यतः प्र ब्रवामा कृतानि ।

5.042.06c न ते पूर्वे मघवन्नापरासो न वीर्यं१ नूतनः कश्चनाप ॥

5.042.07a उप स्तुहि प्रथमं रत्नधेयं बृहस्पतिं सनितारं धनानाम् ।

5.042.07c यः शंसते स्तुवते शम्भविष्ठः पुरूवसुरागमज्जोहुवानम् ॥

5.042.08a तवोतिभिः सचमाना अरिष्टा बृहस्पते मघवानः सुवीराः ।

5.042.08c ये अश्वदा उत वा सन्ति गोदा ये वस्त्रदाः सुभगास्तेषु रायः ॥

5.042.09a विसर्माणं कृणुहि वित्तमेषां ये भुञ्जते अपृणन्तो न उक्थैः ।

5.042.09c अपव्रतान्प्रसवे वावृधानान्ब्रह्मद्विषः सूर्याद्यावयस्व ॥

5.042.10a य ओहते रक्षसो देववीतावचक्रेभिस्तं मरुतो नि यात ।

5.042.10c यो वः शमीं शशमानस्य निन्दात्तुच्छ्यान्कामान्करते सिष्विदानः ॥

5.042.11a तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।

5.042.11c यक्ष्वा महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥

5.042.12a दमूनसो अपसो ये सुहस्ता वृष्णः पत्नीर्नद्यो विभ्वतष्टाः ।

5.042.12c सरस्वती बृहद्दिवोत राका दशस्यन्तीर्वरिवस्यन्तु शुभ्राः ॥

5.042.13a प्र सू महे सुशरणाय मेधां गिरं भरे नव्यसीं जायमानाम् ।

5.042.13c य आहना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः ॥

5.042.14a प्र सुष्टुति स्तनयन्तं रुवन्तमिळस्पतिं जरितर्नूनमश्याः ।

5.042.14c यो अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः ॥

5.042.15a एष स्तोमो मारुतं शर्धो अच्छा रुद्रस्य सूनूँर्युवन्यूँरुदश्याः ।

5.042.15c कामो राये हवते मा स्वस्त्युप स्तुहि पृषदश्वाँ अयासः ॥

5.042.16a प्रैष स्तोमः पृथिवीमन्तरिक्षं वनस्पतीँरोषधी राये अश्याः ।

5.042.16c देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ॥

5.042.17a उरौ देवा अनिबाधे स्याम ॥

5.042.18a समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।

5.042.18c आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥

5.043.01a आ धेनवः पयसा तूर्ण्यर्था अमर्धन्तीरुप नो यन्तु मध्वा ।

5.043.01c महो राये बृहतीः सप्त विप्रो मयोभुवो जरिता जोहवीति ॥

5.043.02a आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे ।

5.043.02c पिता माता मधुवचाः सुहस्ता भरेभरे नो यशसावविष्टाम् ॥

5.043.03a अध्वर्यवश्चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रम् ।

5.043.03c होतेव नः प्रथमः पाह्यस्य देव मध्वो ररिमा ते मदाय ॥

5.043.04a दश क्षिपो युञ्जते बाहू अद्रिं सोमस्य या शमितारा सुहस्ता ।

5.043.04c मध्वो रसं सुगभस्तिर्गिरिष्ठां चनिश्चदद्दुदुहे शुक्रमंशुः ॥

5.043.05a असावि ते जुजुषाणाय सोमः क्रत्वे दक्षाय बृहते मदाय ।

5.043.05c हरी रथे सुधुरा योगे अर्वागिन्द्र प्रिया कृणुहि हूयमानः ॥

5.043.06a आ नो महीमरमतिं सजोषा ग्नां देवीं नमसा रातहव्याम् ।

5.043.06c मधोर्मदाय बृहतीमृतज्ञामाग्ने वह पथिभिर्देवयानैः ॥

5.043.07a अञ्जन्ति यं प्रथयन्तो न विप्रा वपावन्तं नाग्निना तपन्तः ।

5.043.07c पितुर्न पुत्र उपसि प्रेष्ठ आ घर्मो अग्निमृतयन्नसादि ॥

5.043.08a अच्छा मही बृहती शंतमा गीर्दूतो न गन्त्वश्विना हुवध्यै ।

5.043.08c मयोभुवा सरथा यातमर्वाग्गन्तं निधिं धुरमाणिर्न नाभिम् ॥

5.043.09a प्र तव्यसो नमउक्तिं तुरस्याहं पूष्ण उत वायोरदिक्षि ।

5.043.09c या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उत त्मन् ॥

5.043.10a आ नामभिर्मरुतो वक्षि विश्वाना रूपेभिर्जातवेदो हुवानः ।

5.043.10c यज्ञं गिरो जरितुः सुष्टुतिं च विश्वे गन्त मरुतो विश्व ऊती ॥

5.043.11a आ नो दिवो बृहतः पर्वतादा सरस्वती यजता गन्तु यज्ञम् ।

5.043.11c हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु ॥

5.043.12a आ वेधसं नीलपृष्ठं बृहन्तं बृहस्पतिं सदने सादयध्वम् ।

5.043.12c सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम ॥

5.043.13a आ धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गन्त्वोमभिर्हुवानः ।

5.043.13c ग्ना वसान ओषधीरमृध्रस्त्रिधातुशृङ्गो वृषभो वयोधाः ॥

5.043.14a मातुष्पदे परमे शुक्र आयोर्विपन्यवो रास्पिरासो अग्मन् ।

5.043.14c सुशेव्यं नमसा रातहव्याः शिशुं मृजन्त्यायवो न वासे ॥

5.043.15a बृहद्वयो बृहते तुभ्यमग्ने धियाजुरो मिथुनासः सचन्त ।

5.043.15c देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ॥

5.043.16a उरौ देवा अनिबाधे स्याम ॥

5.043.17a समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।

5.043.17c आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥

5.044.01a तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् ।

5.044.01c प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्धसे ॥

5.044.02a श्रिये सुदृशीरुपरस्य याः स्वर्विरोचमानः ककुभामचोदते ।

5.044.02c सुगोपा असि न दभाय सुक्रतो परो मायाभिरृत आस नाम ते ॥

5.044.03a अत्यं हविः सचते सच्च धातु चारिष्टगातुः स होता सहोभरिः ।

5.044.03c प्रसर्स्राणो अनु बर्हिर्वृषा शिशुर्मध्ये युवाजरो विस्रुहा हितः ॥

5.044.04a प्र व एते सुयुजो यामन्निष्टये नीचीरमुष्मै यम्य ऋतावृधः ।

5.044.04c सुयन्तुभिः सर्वशासैरभीशुभिः क्रिविर्नामानि प्रवणे मुषायति ॥

5.044.05a संजर्भुराणस्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः ।

5.044.05c धारवाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे ॥

5.044.06a यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा ।

5.044.06c महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरमनपच्युतं सहः ॥

5.044.07a वेत्यग्रुर्जनिवान्वा अति स्पृधः समर्यता मनसा सूर्यः कविः ।

5.044.07c घ्रंसं रक्षन्तं परि विश्वतो गयमस्माकं शर्म वनवत्स्वावसुः ॥

5.044.08a ज्यायांसमस्य यतुनस्य केतुन ऋषिस्वरं चरति यासु नाम ते ।

5.044.08c यादृश्मिन्धायि तमपस्यया विदद्य उ स्वयं वहते सो अरं करत् ॥

5.044.09a समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता ।

5.044.09c अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विद्यते पूतबन्धनी ॥

5.044.10a स हि क्षत्रस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्रेः ।

5.044.10c अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यम् ॥

5.044.11a श्येन आसामदितिः कक्ष्यो३ मदो विश्ववारस्य यजतस्य मायिनः ।

5.044.11c समन्यमन्यमर्थयन्त्येतवे विदुर्विषाणं परिपानमन्ति ते ॥

5.044.12a सदापृणो यजतो वि द्विषो वधीद्बाहुवृक्तः श्रुतवित्तर्यो वः सचा ।

5.044.12c उभा स वरा प्रत्येति भाति च यदीं गणं भजते सुप्रयावभिः ॥

5.044.13a सुतम्भरो यजमानस्य सत्पतिर्विश्वासामूधः स धियामुदञ्चनः ।

5.044.13c भरद्धेनू रसवच्छिश्रिये पयोऽनुब्रुवाणो अध्येति न स्वपन् ॥

5.044.14a यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।

5.044.14c यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥

5.044.15a अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि यन्ति ।

5.044.15c अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥

5.045.01a विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः ।

5.045.01c अपावृत व्रजिनीरुत्स्वर्गाद्वि दुरो मानुषीर्देव आवः ॥

5.045.02a वि सूर्यो अमतिं न श्रियं सादोर्वाद्गवां माता जानती गात् ।

5.045.02c धन्वर्णसो नद्य१ः खादोअर्णाः स्थूणेव सुमिता दृंहत द्यौः ॥

5.045.03a अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ।

5.045.03c वि पर्वतो जिहीत साधत द्यौराविवासन्तो दसयन्त भूम ॥

5.045.04a सूक्तेभिर्वो वचोभिर्देवजुष्टैरिन्द्रा न्व१ग्नी अवसे हुवध्यै ।

5.045.04c उक्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासन्तो मरुतो यजन्ति ॥

5.045.05a एतो न्व१द्य सुध्यो३ भवाम प्र दुच्छुना मिनवामा वरीयः ।

5.045.05c आरे द्वेषांसि सनुतर्दधामायाम प्राञ्चो यजमानमच्छ ॥

5.045.06a एता धियं कृणवामा सखायोऽप या माताँ ऋणुत व्रजं गोः ।

5.045.06c यया मनुर्विशिशिप्रं जिगाय यया वणिग्वङ्कुरापा पुरीषम् ॥

5.045.07a अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दश मासो नवग्वाः ।

5.045.07c ऋतं यती सरमा गा अविन्दद्विश्वानि सत्याङ्गिराश्चकार ॥

5.045.08a विश्वे अस्या व्युषि माहिनायाः सं यद्गोभिरङ्गिरसो नवन्त ।

5.045.08c उत्स आसां परमे सधस्थ ऋतस्य पथा सरमा विदद्गाः ॥

5.045.09a आ सूर्यो यातु सप्ताश्वः क्षेत्रं यदस्योर्विया दीर्घयाथे ।

5.045.09c रघुः श्येनः पतयदन्धो अच्छा युवा कविर्दीदयद्गोषु गच्छन् ॥

5.045.10a आ सूर्यो अरुहच्छुक्रमर्णोऽयुक्त यद्धरितो वीतपृष्ठाः ।

5.045.10c उद्ना न नावमनयन्त धीरा आशृण्वतीरापो अर्वागतिष्ठन् ॥

5.045.11a धियं वो अप्सु दधिषे स्वर्षां ययातरन्दश मासो नवग्वाः ।

5.045.11c अया धिया स्याम देवगोपा अया धिया तुतुर्यामात्यंहः ॥

5.046.01a हयो न विद्वाँ अयुजि स्वयं धुरि तां वहामि प्रतरणीमवस्युवम् ।

5.046.01c नास्या वश्मि विमुचं नावृतं पुनर्विद्वान्पथः पुरएत ऋजु नेषति ॥

5.046.02a अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।

5.046.02c उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ॥

5.046.03a इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वताँ अपः ।

5.046.03c हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये ॥

5.046.04a उत नो विष्णुरुत वातो अस्रिधो द्रविणोदा उत सोमो मयस्करत् ।

5.046.04c उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वानु मंसते ॥

5.046.05a उत त्यन्नो मारुतं शर्ध आ गमद्दिविक्षयं यजतं बर्हिरासदे ।

5.046.05c बृहस्पतिः शर्म पूषोत नो यमद्वरूथ्यं१ वरुणो मित्रो अर्यमा ॥

5.046.06a उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नद्य१स्त्रामणे भुवन् ।

5.046.06c भगो विभक्ता शवसावसा गमदुरुव्यचा अदितिः श्रोतु मे हवम् ॥

5.046.07a देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये ।

5.046.07c याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत ॥

5.046.08a उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्य१ग्नाय्यश्विनी राट् ।

5.046.08c आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ॥

5.047.01a प्रयुञ्जती दिव एति ब्रुवाणा मही माता दुहितुर्बोधयन्ती ।

5.047.01c आविवासन्ती युवतिर्मनीषा पितृभ्य आ सदने जोहुवाना ॥

5.047.02a अजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिम् ।

5.047.02c अनन्तास उरवो विश्वतः सीं परि द्यावापृथिवी यन्ति पन्थाः ॥

5.047.03a उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।

5.047.03c मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ ॥

5.047.04a चत्वार ईं बिभ्रति क्षेमयन्तो दश गर्भं चरसे धापयन्ते ।

5.047.04c त्रिधातवः परमा अस्य गावो दिवश्चरन्ति परि सद्यो अन्तान् ॥

5.047.05a इदं वपुर्निवचनं जनासश्चरन्ति यन्नद्यस्तस्थुरापः ।

5.047.05c द्वे यदीं बिभृतो मातुरन्ये इहेह जाते यम्या३ सबन्धू ॥

5.047.06a वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयन्ति ।

5.047.06c उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यन्त्यच्छ ॥

5.047.07a तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम् ।

5.047.07c अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥

5.048.01a कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम् ।

5.048.01c आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी ॥

5.048.02a ता अत्नत वयुनं वीरवक्षणं समान्या वृतया विश्वमा रजः ।

5.048.02c अपो अपाचीरपरा अपेजते प्र पूर्वाभिस्तिरते देवयुर्जनः ॥

5.048.03a आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति मायिनि ।

5.048.03c शतं वा यस्य प्रचरन्स्वे दमे संवर्तयन्तो वि च वर्तयन्नहा ॥

5.048.04a तामस्य रीतिं परशोरिव प्रत्यनीकमख्यं भुजे अस्य वर्पसः ।

5.048.04c सचा यदि पितुमन्तमिव क्षयं रत्नं दधाति भरहूतये विशे ॥

5.048.05a स जिह्वया चतुरनीक ऋञ्जते चारु वसानो वरुणो यतन्नरिम् ।

5.048.05c न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यम् ॥

5.049.01a देवं वो अद्य सवितारमेषे भगं च रत्नं विभजन्तमायोः ।

5.049.01c आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन् ॥

5.049.02a प्रति प्रयाणमसुरस्य विद्वान्सूक्तैर्देवं सवितारं दुवस्य ।

5.049.02c उप ब्रुवीत नमसा विजानञ्ज्येष्ठं च रत्नं विभजन्तमायोः ॥

5.049.03a अदत्रया दयते वार्याणि पूषा भगो अदितिर्वस्त उस्रः ।

5.049.03c इन्द्रो विष्णुर्वरुणो मित्रो अग्निरहानि भद्रा जनयन्त दस्माः ॥

5.049.04a तन्नो अनर्वा सविता वरूथं तत्सिन्धव इषयन्तो अनु ग्मन् ।

5.049.04c उप यद्वोचे अध्वरस्य होता रायः स्याम पतयो वाजरत्नाः ॥

5.049.05a प्र ये वसुभ्य ईवदा नमो दुर्ये मित्रे वरुणे सूक्तवाचः ।

5.049.05c अवैत्वभ्वं कृणुता वरीयो दिवस्पृथिव्योरवसा मदेम ॥

5.050.01a विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।

5.050.01c विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ॥

5.050.02a ते ते देव नेतर्ये चेमाँ अनुशसे ।

5.050.02c ते राया ते ह्या३पृचे सचेमहि सचथ्यैः ॥

5.050.03a अतो न आ नॄनतिथीनतः पत्नीर्दशस्यत ।

5.050.03c आरे विश्वं पथेष्ठां द्विषो युयोतु यूयुविः ॥

5.050.04a यत्र वह्निरभिहितो दुद्रवद्द्रोण्यः पशुः ।

5.050.04c नृमणा वीरपस्त्योऽर्णा धीरेव सनिता ॥

5.050.05a एष ते देव नेता रथस्पतिः शं रयिः ।

5.050.05c शं राये शं स्वस्तय इषस्तुतो मनामहे देवस्तुतो मनामहे ॥

5.051.01a अग्ने सुतस्य पीतये विश्वैरूमेभिरा गहि ।

5.051.01c देवेभिर्हव्यदातये ॥

5.051.02a ऋतधीतय आ गत सत्यधर्माणो अध्वरम् ।

5.051.02c अग्नेः पिबत जिह्वया ॥

5.051.03a विप्रेभिर्विप्र सन्त्य प्रातर्यावभिरा गहि ।

5.051.03c देवेभिः सोमपीतये ॥

5.051.04a अयं सोमश्चमू सुतोऽमत्रे परि षिच्यते ।

5.051.04c प्रिय इन्द्राय वायवे ॥

5.051.05a वायवा याहि वीतये जुषाणो हव्यदातये ।

5.051.05c पिबा सुतस्यान्धसो अभि प्रयः ॥

5.051.06a इन्द्रश्च वायवेषां सुतानां पीतिमर्हथः ।

5.051.06c ताञ्जुषेथामरेपसावभि प्रयः ॥

5.051.07a सुता इन्द्राय वायवे सोमासो दध्याशिरः ।

5.051.07c निम्नं न यन्ति सिन्धवोऽभि प्रयः ॥

5.051.08a सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः ।

5.051.08c आ याह्यग्ने अत्रिवत्सुते रण ॥

5.051.09a सजूर्मित्रावरुणाभ्यां सजूः सोमेन विष्णुना ।

5.051.09c आ याह्यग्ने अत्रिवत्सुते रण ॥

5.051.10a सजूरादित्यैर्वसुभिः सजूरिन्द्रेण वायुना ।

5.051.10c आ याह्यग्ने अत्रिवत्सुते रण ॥

5.051.11a स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।

5.051.11c स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥

5.051.12a स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।

5.051.12c बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥

5.051.13a विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।

5.051.13c देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥

5.051.14a स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।

5.051.14c स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥

5.051.15a स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव ।

5.051.15c पुनर्ददताघ्नता जानता सं गमेमहि ॥

5.052.01a प्र श्यावाश्व धृष्णुयार्चा मरुद्भिर्ऋक्वभिः ।

5.052.01c ये अद्रोघमनुष्वधं श्रवो मदन्ति यज्ञियाः ॥

5.052.02a ते हि स्थिरस्य शवसः सखायः सन्ति धृष्णुया ।

5.052.02c ते यामन्ना धृषद्विनस्त्मना पान्ति शश्वतः ॥

5.052.03a ते स्यन्द्रासो नोक्षणोऽति ष्कन्दन्ति शर्वरीः ।

5.052.03c मरुतामधा महो दिवि क्षमा च मन्महे ॥

5.052.04a मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया ।

5.052.04c विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः ॥

5.052.05a अर्हन्तो ये सुदानवो नरो असामिशवसः ।

5.052.05c प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः ॥

5.052.06a आ रुक्मैरा युधा नर ऋष्वा ऋष्टीरसृक्षत ।

5.052.06c अन्वेनाँ अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः ॥

5.052.07a ये वावृधन्त पार्थिवा य उरावन्तरिक्ष आ ।

5.052.07c वृजने वा नदीनां सधस्थे वा महो दिवः ॥

5.052.08a शर्धो मारुतमुच्छंस सत्यशवसमृभ्वसम् ।

5.052.08c उत स्म ते शुभे नरः प्र स्यन्द्रा युजत त्मना ॥

5.052.09a उत स्म ते परुष्ण्यामूर्णा वसत शुन्ध्यवः ।

5.052.09c उत पव्या रथानामद्रिं भिन्दन्त्योजसा ॥

5.052.10a आपथयो विपथयोऽन्तस्पथा अनुपथाः ।

5.052.10c एतेभिर्मह्यं नामभिर्यज्ञं विष्टार ओहते ॥

5.052.11a अधा नरो न्योहतेऽधा नियुत ओहते ।

5.052.11c अधा पारावता इति चित्रा रूपाणि दर्श्या ॥

5.052.12a छन्दस्तुभः कुभन्यव उत्समा कीरिणो नृतुः ।

5.052.12c ते मे के चिन्न तायव ऊमा आसन्दृशि त्विषे ॥

5.052.13a य ऋष्वा ऋष्टिविद्युतः कवयः सन्ति वेधसः ।

5.052.13c तमृषे मारुतं गणं नमस्या रमया गिरा ॥

5.052.14a अच्छ ऋषे मारुतं गणं दाना मित्रं न योषणा ।

5.052.14c दिवो वा धृष्णव ओजसा स्तुता धीभिरिषण्यत ॥

5.052.15a नू मन्वान एषां देवाँ अच्छा न वक्षणा ।

5.052.15c दाना सचेत सूरिभिर्यामश्रुतेभिरञ्जिभिः ॥

5.052.16a प्र ये मे बन्ध्वेषे गां वोचन्त सूरयः पृश्निं वोचन्त मातरम् ।

5.052.16c अधा पितरमिष्मिणं रुद्रं वोचन्त शिक्वसः ॥

5.052.17a सप्त मे सप्त शाकिन एकमेका शता ददुः ।

5.052.17c यमुनायामधि श्रुतमुद्राधो गव्यं मृजे नि राधो अश्व्यं मृजे ॥

5.053.01a को वेद जानमेषां को वा पुरा सुम्नेष्वास मरुताम् ।

5.053.01c यद्युयुज्रे किलास्यः ॥

5.053.02a ऐतान्रथेषु तस्थुषः कः शुश्राव कथा ययुः ।

5.053.02c कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह ॥

5.053.03a ते म आहुर्य आययुरुप द्युभिर्विभिर्मदे ।

5.053.03c नरो मर्या अरेपस इमान्पश्यन्निति ष्टुहि ॥

5.053.04a ये अञ्जिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु ।

5.053.04c श्राया रथेषु धन्वसु ॥

5.053.05a युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः ।

5.053.05c वृष्टी द्यावो यतीरिव ॥

5.053.06a आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।

5.053.06c वि पर्जन्यं सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः ॥

5.053.07a ततृदानाः सिन्धवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा ।

5.053.07c स्यन्ना अश्वा इवाध्वनो विमोचने वि यद्वर्तन्त एन्यः ॥

5.053.08a आ यात मरुतो दिव आन्तरिक्षादमादुत ।

5.053.08c माव स्थात परावतः ॥

5.053.09a मा वो रसानितभा कुभा क्रुमुर्मा वः सिन्धुर्नि रीरमत् ।

5.053.09c मा वः परि ष्ठात्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः ॥

5.053.10a तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनाम् ।

5.053.10c अनु प्र यन्ति वृष्टयः ॥

5.053.11a शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुशस्तिभिः ।

5.053.11c अनु क्रामेम धीतिभिः ॥

5.053.12a कस्मा अद्य सुजाताय रातहव्याय प्र ययुः ।

5.053.12c एना यामेन मरुतः ॥

5.053.13a येन तोकाय तनयाय धान्यं१ बीजं वहध्वे अक्षितम् ।

5.053.13c अस्मभ्यं तद्धत्तन यद्व ईमहे राधो विश्वायु सौभगम् ॥

5.053.14a अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः ।

5.053.14c वृष्ट्वी शं योराप उस्रि भेषजं स्याम मरुतः सह ॥

5.053.15a सुदेवः समहासति सुवीरो नरो मरुतः स मर्त्यः ।

5.053.15c यं त्रायध्वे स्याम ते ॥

5.053.16a स्तुहि भोजान्स्तुवतो अस्य यामनि रणन्गावो न यवसे ।

5.053.16c यतः पूर्वाँ इव सखीँरनु ह्वय गिरा गृणीहि कामिनः ॥

5.054.01a प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युते ।

5.054.01c घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमर्चत ॥

5.054.02a प्र वो मरुतस्तविषा उदन्यवो वयोवृधो अश्वयुजः परिज्रयः ।

5.054.02c सं विद्युता दधति वाशति त्रितः स्वरन्त्यापोऽवना परिज्रयः ॥

5.054.03a विद्युन्महसो नरो अश्मदिद्यवो वातत्विषो मरुतः पर्वतच्युतः ।

5.054.03c अब्दया चिन्मुहुरा ह्रादुनीवृत स्तनयदमा रभसा उदोजसः ॥

5.054.04a व्यक्तून्रुद्रा व्यहानि शिक्वसो व्यन्तरिक्षं वि रजांसि धूतयः ।

5.054.04c वि यदज्राँ अजथ नाव ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ ॥

5.054.05a तद्वीर्यं वो मरुतो महित्वनं दीर्घं ततान सूर्यो न योजनम् ।

5.054.05c एता न यामे अगृभीतशोचिषोऽनश्वदां यन्न्ययातना गिरिम् ॥

5.054.06a अभ्राजि शर्धो मरुतो यदर्णसं मोषथा वृक्षं कपनेव वेधसः ।

5.054.06c अध स्मा नो अरमतिं सजोषसश्चक्षुरिव यन्तमनु नेषथा सुगम् ॥

5.054.07a न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति ।

5.054.07c नास्य राय उप दस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ ॥

5.054.08a नियुत्वन्तो ग्रामजितो यथा नरोऽर्यमणो न मरुतः कबन्धिनः ।

5.054.08c पिन्वन्त्युत्सं यदिनासो अस्वरन्व्युन्दन्ति पृथिवीं मध्वो अन्धसा ॥

5.054.09a प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौर्भवति प्रयद्भ्यः ।

5.054.09c प्रवत्वतीः पथ्या अन्तरिक्ष्याः प्रवत्वन्तः पर्वता जीरदानवः ॥

5.054.10a यन्मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा दिवो नरः ।

5.054.10c न वोऽश्वाः श्रथयन्ताह सिस्रतः सद्यो अस्याध्वनः पारमश्नुथ ॥

5.054.11a अंसेषु व ऋष्टयः पत्सु खादयो वक्षस्सु रुक्मा मरुतो रथे शुभः ।

5.054.11c अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययीः ॥

5.054.12a तं नाकमर्यो अगृभीतशोचिषं रुशत्पिप्पलं मरुतो वि धूनुथ ।

5.054.12c समच्यन्त वृजनातित्विषन्त यत्स्वरन्ति घोषं विततमृतायवः ॥

5.054.13a युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो३ वयस्वतः ।

5.054.13c न यो युच्छति तिष्यो३ यथा दिवो३ऽस्मे रारन्त मरुतः सहस्रिणम् ॥

5.054.14a यूयं रयिं मरुत स्पार्हवीरं यूयमृषिमवथ सामविप्रम् ।

5.054.14c यूयमर्वन्तं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमन्तम् ॥

5.054.15a तद्वो यामि द्रविणं सद्यऊतयो येना स्व१र्ण ततनाम नॄँरभि ।

5.054.15c इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः ॥

5.055.01a प्रयज्यवो मरुतो भ्राजदृष्टयो बृहद्वयो दधिरे रुक्मवक्षसः ।

5.055.01c ईयन्ते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा अवृत्सत ॥

5.055.02a स्वयं दधिध्वे तविषीं यथा विद बृहन्महान्त उर्विया वि राजथ ।

5.055.02c उतान्तरिक्षं ममिरे व्योजसा शुभं यातामनु रथा अवृत्सत ॥

5.055.03a साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चिदा प्रतरं वावृधुर्नरः ।

5.055.03c विरोकिणः सूर्यस्येव रश्मयः शुभं यातामनु रथा अवृत्सत ॥

5.055.04a आभूषेण्यं वो मरुतो महित्वनं दिदृक्षेण्यं सूर्यस्येव चक्षणम् ।

5.055.04c उतो अस्माँ अमृतत्वे दधातन शुभं यातामनु रथा अवृत्सत ॥

5.055.05a उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।

5.055.05c न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत ॥

5.055.06a यदश्वान्धूर्षु पृषतीरयुग्ध्वं हिरण्ययान्प्रत्यत्काँ अमुग्ध्वम् ।

5.055.06c विश्वा इत्स्पृधो मरुतो व्यस्यथ शुभं यातामनु रथा अवृत्सत ॥

5.055.07a न पर्वता न नद्यो वरन्त वो यत्राचिध्वं मरुतो गच्छथेदु तत् ।

5.055.07c उत द्यावापृथिवी याथना परि शुभं यातामनु रथा अवृत्सत ॥

5.055.08a यत्पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते ।

5.055.08c विश्वस्य तस्य भवथा नवेदसः शुभं यातामनु रथा अवृत्सत ॥

5.055.09a मृळत नो मरुतो मा वधिष्टनास्मभ्यं शर्म बहुलं वि यन्तन ।

5.055.09c अधि स्तोत्रस्य सख्यस्य गातन शुभं यातामनु रथा अवृत्सत ॥

5.055.10a यूयमस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः ।

5.055.10c जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणाम् ॥

5.056.01a अग्ने शर्धन्तमा गणं पिष्टं रुक्मेभिरञ्जिभिः ।

5.056.01c विशो अद्य मरुतामव ह्वये दिवश्चिद्रोचनादधि ॥

5.056.02a यथा चिन्मन्यसे हृदा तदिन्मे जग्मुराशसः ।

5.056.02c ये ते नेदिष्ठं हवनान्यागमन्तान्वर्ध भीमसंदृशः ॥

5.056.03a मीळ्हुष्मतीव पृथिवी पराहता मदन्त्येत्यस्मदा ।

5.056.03c ऋक्षो न वो मरुतः शिमीवाँ अमो दुध्रो गौरिव भीमयुः ॥

5.056.04a नि ये रिणन्त्योजसा वृथा गावो न दुर्धुरः ।

5.056.04c अश्मानं चित्स्वर्यं१ पर्वतं गिरिं प्र च्यावयन्ति यामभिः ॥

5.056.05a उत्तिष्ठ नूनमेषां स्तोमैः समुक्षितानाम् ।

5.056.05c मरुतां पुरुतममपूर्व्यं गवां सर्गमिव ह्वये ॥

5.056.06a युङ्ग्ध्वं ह्यरुषी रथे युङ्ग्ध्वं रथेषु रोहितः ।

5.056.06c युङ्ग्ध्वं हरी अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ॥

5.056.07a उत स्य वाज्यरुषस्तुविष्वणिरिह स्म धायि दर्शतः ।

5.056.07c मा वो यामेषु मरुतश्चिरं करत्प्र तं रथेषु चोदत ॥

5.056.08a रथं नु मारुतं वयं श्रवस्युमा हुवामहे ।

5.056.08c आ यस्मिन्तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥

5.056.09a तं वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे ।

5.056.09c यस्मिन्सुजाता सुभगा महीयते सचा मरुत्सु मीळ्हुषी ॥

5.057.01a आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन ।

5.057.01c इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे ॥

5.057.02a वाशीमन्त ऋष्टिमन्तो मनीषिणः सुधन्वान इषुमन्तो निषङ्गिणः ।

5.057.02c स्वश्वा स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभम् ॥

5.057.03a धूनुथ द्यां पर्वतान्दाशुषे वसु नि वो वना जिहते यामनो भिया ।

5.057.03c कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वम् ॥

5.057.04a वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः ।

5.057.04c पिशङ्गाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ॥

5.057.05a पुरुद्रप्सा अञ्जिमन्तः सुदानवस्त्वेषसंदृशो अनवभ्रराधसः ।

5.057.05c सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ॥

5.057.06a ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितम् ।

5.057.06c नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे ॥

5.057.07a गोमदश्वावद्रथवत्सुवीरं चन्द्रवद्राधो मरुतो ददा नः ।

5.057.07c प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य ॥

5.057.08a हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः ।

5.057.08c सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ॥

5.058.01a तमु नूनं तविषीमन्तमेषां स्तुषे गणं मारुतं नव्यसीनाम् ।

5.058.01c य आश्वश्वा अमवद्वहन्त उतेशिरे अमृतस्य स्वराजः ॥

5.058.02a त्वेषं गणं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारम् ।

5.058.02c मयोभुवो ये अमिता महित्वा वन्दस्व विप्र तुविराधसो नॄन् ॥

5.058.03a आ वो यन्तूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनन्ति ।

5.058.03c अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः ॥

5.058.04a यूयं राजानमिर्यं जनाय विभ्वतष्टं जनयथा यजत्राः ।

5.058.04c युष्मदेति मुष्टिहा बाहुजूतो युष्मत्सदश्वो मरुतः सुवीरः ॥

5.058.05a अरा इवेदचरमा अहेव प्रप्र जायन्ते अकवा महोभिः ।

5.058.05c पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः ॥

5.058.06a यत्प्रायासिष्ट पृषतीभिरश्वैर्वीळुपविभिर्मरुतो रथेभिः ।

5.058.06c क्षोदन्त आपो रिणते वनान्यवोस्रियो वृषभः क्रन्दतु द्यौः ॥

5.058.07a प्रथिष्ट यामन्पृथिवी चिदेषां भर्तेव गर्भं स्वमिच्छवो धुः ।

5.058.07c वातान्ह्यश्वान्धुर्यायुयुज्रे वर्षं स्वेदं चक्रिरे रुद्रियासः ॥

5.058.08a हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः ।

5.058.08c सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ॥

5.059.01a प्र व स्पळक्रन्सुविताय दावनेऽर्चा दिवे प्र पृथिव्या ऋतं भरे ।

5.059.01c उक्षन्ते अश्वान्तरुषन्त आ रजोऽनु स्वं भानुं श्रथयन्ते अर्णवैः ॥

5.059.02a अमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती ।

5.059.02c दूरेदृशो ये चितयन्त एमभिरन्तर्महे विदथे येतिरे नरः ॥

5.059.03a गवामिव श्रियसे शृङ्गमुत्तमं सूर्यो न चक्षू रजसो विसर्जने ।

5.059.03c अत्या इव सुभ्व१श्चारव स्थन मर्या इव श्रियसे चेतथा नरः ॥

5.059.04a को वो महान्ति महतामुदश्नवत्कस्काव्या मरुतः को ह पौंस्या ।

5.059.04c यूयं ह भूमिं किरणं न रेजथ प्र यद्भरध्वे सुविताय दावने ॥

5.059.05a अश्वा इवेदरुषासः सबन्धवः शूरा इव प्रयुधः प्रोत युयुधुः ।

5.059.05c मर्या इव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनन्ति वृष्टिभिः ॥

5.059.06a ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यमासो महसा वि वावृधुः ।

5.059.06c सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन ॥

5.059.07a वयो न ये श्रेणीः पप्तुरोजसान्तान्दिवो बृहतः सानुनस्परि ।

5.059.07c अश्वास एषामुभये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः ॥

5.059.08a मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतन्ताम् ।

5.059.08c आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः ॥

5.060.01a ईळे अग्निं स्ववसं नमोभिरिह प्रसत्तो वि चयत्कृतं नः ।

5.060.01c रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्याम् ॥

5.060.02a आ ये तस्थुः पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु ।

5.060.02c वना चिदुग्रा जिहते नि वो भिया पृथिवी चिद्रेजते पर्वतश्चित् ॥

5.060.03a पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित्सानु रेजत स्वने वः ।

5.060.03c यत्क्रीळथ मरुत ऋष्टिमन्त आप इव सध्र्यञ्चो धवध्वे ॥

5.060.04a वरा इवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे ।

5.060.04c श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु ॥

5.060.05a अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय ।

5.060.05c युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः ॥

5.060.06a यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दिवि ष्ठ ।

5.060.06c अतो नो रुद्रा उत वा न्व१स्याग्ने वित्ताद्धविषो यद्यजाम ॥

5.060.07a अग्निश्च यन्मरुतो विश्ववेदसो दिवो वहध्व उत्तरादधि ष्णुभिः ।

5.060.07c ते मन्दसाना धुनयो रिशादसो वामं धत्त यजमानाय सुन्वते ॥

5.060.08a अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः सोमं पिब मन्दसानो गणश्रिभिः ।

5.060.08c पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर प्रदिवा केतुना सजूः ॥

5.061.01a के ष्ठा नरः श्रेष्ठतमा य एकएक आयय ।

5.061.01c परमस्याः परावतः ॥

5.061.02a क्व१ वोऽश्वाः क्वा३भीशवः कथं शेक कथा यय ।

5.061.02c पृष्ठे सदो नसोर्यमः ॥

5.061.03a जघने चोद एषां वि सक्थानि नरो यमुः ।

5.061.03c पुत्रकृथे न जनयः ॥

5.061.04a परा वीरास एतन मर्यासो भद्रजानयः ।

5.061.04c अग्नितपो यथासथ ॥

5.061.05a सनत्साश्व्यं पशुमुत गव्यं शतावयम् ।

5.061.05c श्यावाश्वस्तुताय या दोर्वीरायोपबर्बृहत् ॥

5.061.06a उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी ।

5.061.06c अदेवत्रादराधसः ॥

5.061.07a वि या जानाति जसुरिं वि तृष्यन्तं वि कामिनम् ।

5.061.07c देवत्रा कृणुते मनः ॥

5.061.08a उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः ।

5.061.08c स वैरदेय इत्समः ॥

5.061.09a उत मेऽरपद्युवतिर्ममन्दुषी प्रति श्यावाय वर्तनिम् ।

5.061.09c वि रोहिता पुरुमीळ्हाय येमतुर्विप्राय दीर्घयशसे ॥

5.061.10a यो मे धेनूनां शतं वैददश्विर्यथा ददत् ।

5.061.10c तरन्त इव मंहना ॥

5.061.11a य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु ।

5.061.11c अत्र श्रवांसि दधिरे ॥

5.061.12a येषां श्रियाधि रोदसी विभ्राजन्ते रथेष्वा ।

5.061.12c दिवि रुक्म इवोपरि ॥

5.061.13a युवा स मारुतो गणस्त्वेषरथो अनेद्यः ।

5.061.13c शुभंयावाप्रतिष्कुतः ॥

5.061.14a को वेद नूनमेषां यत्रा मदन्ति धूतयः ।

5.061.14c ऋतजाता अरेपसः ॥

5.061.15a यूयं मर्तं विपन्यवः प्रणेतार इत्था धिया ।

5.061.15c श्रोतारो यामहूतिषु ॥

5.061.16a ते नो वसूनि काम्या पुरुश्चन्द्रा रिशादसः ।

5.061.16c आ यज्ञियासो ववृत्तन ॥

5.061.17a एतं मे स्तोममूर्म्ये दार्भ्याय परा वह ।

5.061.17c गिरो देवि रथीरिव ॥

5.061.18a उत मे वोचतादिति सुतसोमे रथवीतौ ।

5.061.18c न कामो अप वेति मे ॥

5.061.19a एष क्षेति रथवीतिर्मघवा गोमतीरनु ।

5.061.19c पर्वतेष्वपश्रितः ॥

5.062.01a ऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचन्त्यश्वान् ।

5.062.01c दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यम् ॥

5.062.02a तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुह्रे ।

5.062.02c विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः पविरा ववर्त ॥

5.062.03a अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः ।

5.062.03c वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू ॥

5.062.04a आ वामश्वासः सुयुजो वहन्तु यतरश्मय उप यन्त्वर्वाक् ।

5.062.04c घृतस्य निर्णिगनु वर्तते वामुप सिन्धवः प्रदिवि क्षरन्ति ॥

5.062.05a अनु श्रुताममतिं वर्धदुर्वीं बर्हिरिव यजुषा रक्षमाणा ।

5.062.05c नमस्वन्ता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वन्तः ॥

5.062.06a अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वन्तः ।

5.062.06c राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ ॥

5.062.07a हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्य१श्वाजनीव ।

5.062.07c भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य ॥

5.062.08a हिरण्यरूपमुषसो व्युष्टावयस्थूणमुदिता सूर्यस्य ।

5.062.08c आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च ॥

5.062.09a यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा ।

5.062.09c तेन नो मित्रावरुणावविष्टं सिषासन्तो जिगीवांसः स्याम ॥

5.063.01a ऋतस्य गोपावधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि ।

5.063.01c यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः ॥

5.063.02a सम्राजावस्य भुवनस्य राजथो मित्रावरुणा विदथे स्वर्दृशा ।

5.063.02c वृष्टिं वां राधो अमृतत्वमीमहे द्यावापृथिवी वि चरन्ति तन्यवः ॥

5.063.03a सम्राजा उग्रा वृषभा दिवस्पती पृथिव्या मित्रावरुणा विचर्षणी ।

5.063.03c चित्रेभिरभ्रैरुप तिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया ॥

5.063.04a माया वां मित्रावरुणा दिवि श्रिता सूर्यो ज्योतिश्चरति चित्रमायुधम् ।

5.063.04c तमभ्रेण वृष्ट्या गूहथो दिवि पर्जन्य द्रप्सा मधुमन्त ईरते ॥

5.063.05a रथं युञ्जते मरुतः शुभे सुखं शूरो न मित्रावरुणा गविष्टिषु ।

5.063.05c रजांसि चित्रा वि चरन्ति तन्यवो दिवः सम्राजा पयसा न उक्षतम् ॥

5.063.06a वाचं सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीम् ।

5.063.06c अभ्रा वसत मरुतः सु मायया द्यां वर्षयतमरुणामरेपसम् ॥

5.063.07a धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया ।

5.063.07c ऋतेन विश्वं भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्यं रथम् ॥

5.064.01a वरुणं वो रिशादसमृचा मित्रं हवामहे ।

5.064.01c परि व्रजेव बाह्वोर्जगन्वांसा स्वर्णरम् ॥

5.064.02a ता बाहवा सुचेतुना प्र यन्तमस्मा अर्चते ।

5.064.02c शेवं हि जार्यं वां विश्वासु क्षासु जोगुवे ॥

5.064.03a यन्नूनमश्यां गतिं मित्रस्य यायां पथा ।

5.064.03c अस्य प्रियस्य शर्मण्यहिंसानस्य सश्चिरे ॥

5.064.04a युवाभ्यां मित्रावरुणोपमं धेयामृचा ।

5.064.04c यद्ध क्षये मघोनां स्तोतॄणां च स्पूर्धसे ॥

5.064.05a आ नो मित्र सुदीतिभिर्वरुणश्च सधस्थ आ ।

5.064.05c स्वे क्षये मघोनां सखीनां च वृधसे ॥

5.064.06a युवं नो येषु वरुण क्षत्रं बृहच्च बिभृथः ।

5.064.06c उरु णो वाजसातये कृतं राये स्वस्तये ॥

5.064.07a उच्छन्त्यां मे यजता देवक्षत्रे रुशद्गवि ।

5.064.07c सुतं सोमं न हस्तिभिरा पड्भिर्धावतं नरा बिभ्रतावर्चनानसम् ॥

5.065.01a यश्चिकेत स सुक्रतुर्देवत्रा स ब्रवीतु नः ।

5.065.01c वरुणो यस्य दर्शतो मित्रो वा वनते गिरः ॥

5.065.02a ता हि श्रेष्ठवर्चसा राजाना दीर्घश्रुत्तमा ।

5.065.02c ता सत्पती ऋतावृध ऋतावाना जनेजने ॥

5.065.03a ता वामियानोऽवसे पूर्वा उप ब्रुवे सचा ।

5.065.03c स्वश्वासः सु चेतुना वाजाँ अभि प्र दावने ॥

5.065.04a मित्रो अंहोश्चिदादुरु क्षयाय गातुं वनते ।

5.065.04c मित्रस्य हि प्रतूर्वतः सुमतिरस्ति विधतः ॥

5.065.05a वयं मित्रस्यावसि स्याम सप्रथस्तमे ।

5.065.05c अनेहसस्त्वोतयः सत्रा वरुणशेषसः ॥

5.065.06a युवं मित्रेमं जनं यतथः सं च नयथः ।

5.065.06c मा मघोनः परि ख्यतं मो अस्माकमृषीणां गोपीथे न उरुष्यतम् ॥

5.066.01a आ चिकितान सुक्रतू देवौ मर्त रिशादसा ।

5.066.01c वरुणाय ऋतपेशसे दधीत प्रयसे महे ॥

5.066.02a ता हि क्षत्रमविह्रुतं सम्यगसुर्य१माशाते ।

5.066.02c अध व्रतेव मानुषं स्व१र्ण धायि दर्शतम् ॥

5.066.03a ता वामेषे रथानामुर्वीं गव्यूतिमेषाम् ।

5.066.03c रातहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे ॥

5.066.04a अधा हि काव्या युवं दक्षस्य पूर्भिरद्भुता ।

5.066.04c नि केतुना जनानां चिकेथे पूतदक्षसा ॥

5.066.05a तदृतं पृथिवि बृहच्छ्रवएष ऋषीणाम् ।

5.066.05c ज्रयसानावरं पृथ्वति क्षरन्ति यामभिः ॥

5.066.06a आ यद्वामीयचक्षसा मित्र वयं च सूरयः ।

5.066.06c व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये ॥

5.067.01a बळित्था देव निष्कृतमादित्या यजतं बृहत् ।

5.067.01c वरुण मित्रार्यमन्वर्षिष्ठं क्षत्रमाशाथे ॥

5.067.02a आ यद्योनिं हिरण्ययं वरुण मित्र सदथः ।

5.067.02c धर्तारा चर्षणीनां यन्तं सुम्नं रिशादसा ॥

5.067.03a विश्वे हि विश्ववेदसो वरुणो मित्रो अर्यमा ।

5.067.03c व्रता पदेव सश्चिरे पान्ति मर्त्यं रिषः ॥

5.067.04a ते हि सत्या ऋतस्पृश ऋतावानो जनेजने ।

5.067.04c सुनीथासः सुदानवोंऽहोश्चिदुरुचक्रयः ॥

5.067.05a को नु वां मित्रास्तुतो वरुणो वा तनूनाम् ।

5.067.05c तत्सु वामेषते मतिरत्रिभ्य एषते मतिः ॥

5.068.01a प्र वो मित्राय गायत वरुणाय विपा गिरा ।

5.068.01c महिक्षत्रावृतं बृहत् ॥

5.068.02a सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च ।

5.068.02c देवा देवेषु प्रशस्ता ॥

5.068.03a ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य ।

5.068.03c महि वां क्षत्रं देवेषु ॥

5.068.04a ऋतमृतेन सपन्तेषिरं दक्षमाशाते ।

5.068.04c अद्रुहा देवौ वर्धेते ॥

5.068.05a वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः ।

5.068.05c बृहन्तं गर्तमाशाते ॥

5.069.01a त्री रोचना वरुण त्रीँरुत द्यून्त्रीणि मित्र धारयथो रजांसि ।

5.069.01c वावृधानावमतिं क्षत्रियस्यानु व्रतं रक्षमाणावजुर्यम् ॥

5.069.02a इरावतीर्वरुण धेनवो वां मधुमद्वां सिन्धवो मित्र दुह्रे ।

5.069.02c त्रयस्तस्थुर्वृषभासस्तिसृणां धिषणानां रेतोधा वि द्युमन्तः ॥

5.069.03a प्रातर्देवीमदितिं जोहवीमि मध्यंदिन उदिता सूर्यस्य ।

5.069.03c राये मित्रावरुणा सर्वतातेळे तोकाय तनयाय शं योः ॥

5.069.04a या धर्तारा रजसो रोचनस्योतादित्या दिव्या पार्थिवस्य ।

5.069.04c न वां देवा अमृता आ मिनन्ति व्रतानि मित्रावरुणा ध्रुवाणि ॥

5.070.01a पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण ।

5.070.01c मित्र वंसि वां सुमतिम् ॥

5.070.02a ता वां सम्यगद्रुह्वाणेषमश्याम धायसे ।

5.070.02c वयं ते रुद्रा स्याम ॥

5.070.03a पातं नो रुद्रा पायुभिरुत त्रायेथां सुत्रात्रा ।

5.070.03c तुर्याम दस्यून्तनूभिः ॥

5.070.04a मा कस्याद्भुतक्रतू यक्षं भुजेमा तनूभिः ।

5.070.04c मा शेषसा मा तनसा ॥

5.071.01a आ नो गन्तं रिशादसा वरुण मित्र बर्हणा ।

5.071.01c उपेमं चारुमध्वरम् ॥

5.071.02a विश्वस्य हि प्रचेतसा वरुण मित्र राजथः ।

5.071.02c ईशाना पिप्यतं धियः ॥

5.071.03a उप नः सुतमा गतं वरुण मित्र दाशुषः ।

5.071.03c अस्य सोमस्य पीतये ॥

5.072.01a आ मित्रे वरुणे वयं गीर्भिर्जुहुमो अत्रिवत् ।

5.072.01c नि बर्हिषि सदतं सोमपीतये ॥

5.072.02a व्रतेन स्थो ध्रुवक्षेमा धर्मणा यातयज्जना ।

5.072.02c नि बर्हिषि सदतं सोमपीतये ॥

5.072.03a मित्रश्च नो वरुणश्च जुषेतां यज्ञमिष्टये ।

5.072.03c नि बर्हिषि सदतां सोमपीतये ॥

5.073.01a यदद्य स्थः परावति यदर्वावत्यश्विना ।

5.073.01c यद्वा पुरू पुरुभुजा यदन्तरिक्ष आ गतम् ॥

5.073.02a इह त्या पुरुभूतमा पुरू दंसांसि बिभ्रता ।

5.073.02c वरस्या याम्यध्रिगू हुवे तुविष्टमा भुजे ॥

5.073.03a ईर्मान्यद्वपुषे वपुश्चक्रं रथस्य येमथुः ।

5.073.03c पर्यन्या नाहुषा युगा मह्ना रजांसि दीयथः ॥

5.073.04a तदू षु वामेना कृतं विश्वा यद्वामनु ष्टवे ।

5.073.04c नाना जातावरेपसा समस्मे बन्धुमेयथुः ॥

5.073.05a आ यद्वां सूर्या रथं तिष्ठद्रघुष्यदं सदा ।

5.073.05c परि वामरुषा वयो घृणा वरन्त आतपः ॥

5.073.06a युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा ।

5.073.06c घर्मं यद्वामरेपसं नासत्यास्ना भुरण्यति ॥

5.073.07a उग्रो वां ककुहो ययिः शृण्वे यामेषु संतनिः ।

5.073.07c यद्वां दंसोभिरश्विनात्रिर्नराववर्तति ॥

5.073.08a मध्व ऊ षु मधूयुवा रुद्रा सिषक्ति पिप्युषी ।

5.073.08c यत्समुद्राति पर्षथः पक्वाः पृक्षो भरन्त वाम् ॥

5.073.09a सत्यमिद्वा उ अश्विना युवामाहुर्मयोभुवा ।

5.073.09c ता यामन्यामहूतमा यामन्ना मृळयत्तमा ॥

5.073.10a इमा ब्रह्माणि वर्धनाश्विभ्यां सन्तु शंतमा ।

5.073.10c या तक्षाम रथाँ इवावोचाम बृहन्नमः ॥

5.074.01a कूष्ठो देवावश्विनाद्या दिवो मनावसू ।

5.074.01c तच्छ्रवथो वृषण्वसू अत्रिर्वामा विवासति ॥

5.074.02a कुह त्या कुह नु श्रुता दिवि देवा नासत्या ।

5.074.02c कस्मिन्ना यतथो जने को वां नदीनां सचा ॥

5.074.03a कं याथः कं ह गच्छथः कमच्छा युञ्जाथे रथम् ।

5.074.03c कस्य ब्रह्माणि रण्यथो वयं वामुश्मसीष्टये ॥

5.074.04a पौरं चिद्ध्युदप्रुतं पौर पौराय जिन्वथः ।

5.074.04c यदीं गृभीततातये सिंहमिव द्रुहस्पदे ॥

5.074.05a प्र च्यवानाज्जुजुरुषो वव्रिमत्कं न मुञ्चथः ।

5.074.05c युवा यदी कृथः पुनरा काममृण्वे वध्वः ॥

5.074.06a अस्ति हि वामिह स्तोता स्मसि वां संदृशि श्रिये ।

5.074.06c नू श्रुतं म आ गतमवोभिर्वाजिनीवसू ॥

5.074.07a को वामद्य पुरूणामा वव्ने मर्त्यानाम् ।

5.074.07c को विप्रो विप्रवाहसा को यज्ञैर्वाजिनीवसू ॥

5.074.08a आ वां रथो रथानां येष्ठो यात्वश्विना ।

5.074.08c पुरू चिदस्मयुस्तिर आङ्गूषो मर्त्येष्वा ॥

5.074.09a शमू षु वां मधूयुवास्माकमस्तु चर्कृतिः ।

5.074.09c अर्वाचीना विचेतसा विभिः श्येनेव दीयतम् ॥

5.074.10a अश्विना यद्ध कर्हि चिच्छुश्रूयातमिमं हवम्।

5.074.10c वस्वीरू षु वां भुजः पृञ्चन्ति सु वां पृचः॥

5.075.01a प्रति प्रियतमं रथं वृषणं वसुवाहनम्।

5.075.01c स्तोता वामश्विनावृषि स्तोमेन प्रति भूषति माध्वी मम श्रुतं हवम्॥

5.075.02a अत्यायातमश्विना तिरो विश्वा अहं सना।

5.075.02c दस्रा हिरण्यवर्तनी सुषुम्ना सिन्धुवाहसा माध्वी मम श्रुतं हवम्॥

5.075.03a आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम्।

5.075.03c रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवम्॥

5.075.04a सुष्टुभो वां वृषण्वसू रथे वाणीच्याहिता।

5.075.04c उत वां ककुहो मृगः पृक्षः कृणोति वापुषो माध्वी मम श्रुतं हवम्॥

5.075.05a बोधिन्मनसा रथ्येषिरा हवनश्रुता।

5.075.05c विभिश्च्यवानमश्विना नि याथो अद्वयाविनं माध्वी मम श्रुतं हवम्॥

5.075.06a आ वां नरा मनोयुजोऽश्वासः प्रुषितप्सवः।

5.075.06c वयो वहन्तु पीतये सह सुम्नेभिरश्विना माध्वी मम श्रुतं हवम्॥

5.075.07a अश्विनावेह गच्छतं नासत्या मा वि वेनतम्।

5.075.07c तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या माध्वी मम श्रुतं हवम्॥

5.075.08a अस्मिन्यज्ञे अदाभ्या जरितारं शुभस्पती।

5.075.08c अवस्युमश्विना युवं गृणन्तमुप भूषथो माध्वी मम श्रुतं हवम् ॥

5.075.09a अभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः ।

5.075.09c अयोजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हवम् ॥

5.076.01a आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः ।

5.076.01c अर्वाञ्चा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छ ॥

5.076.02a न संस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह ।

5.076.02c दिवाभिपित्वेऽवसागमिष्ठा प्रत्यवर्तिं दाशुषे शम्भविष्ठा ॥

5.076.03a उता यातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य ।

5.076.03c दिवा नक्तमवसा शंतमेन नेदानीं पीतिरश्विना ततान ॥

5.076.04a इदं हि वां प्रदिवि स्थानमोक इमे गृहा अश्विनेदं दुरोणम् ।

5.076.04c आ नो दिवो बृहतः पर्वतादाद्भ्यो यातमिषमूर्जं वहन्ता ॥

5.076.05a समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।

5.076.05c आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥

5.077.01a प्रातर्यावाणा प्रथमा यजध्वं पुरा गृध्रादररुषः पिबातः ।

5.077.01c प्रातर्हि यज्ञमश्विना दधाते प्र शंसन्ति कवयः पूर्वभाजः ॥

5.077.02a प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टम् ।

5.077.02c उतान्यो अस्मद्यजते वि चावः पूर्वःपूर्वो यजमानो वनीयान् ॥

5.077.03a हिरण्यत्वङ्मधुवर्णो घृतस्नुः पृक्षो वहन्ना रथो वर्तते वाम् ।

5.077.03c मनोजवा अश्विना वातरंहा येनातियाथो दुरितानि विश्वा ॥

5.077.04a यो भूयिष्ठं नासत्याभ्यां विवेष चनिष्ठं पित्वो ररते विभागे ।

5.077.04c स तोकमस्य पीपरच्छमीभिरनूर्ध्वभासः सदमित्तुतुर्यात् ॥

5.077.05a समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।

5.077.05c आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥

5.078.01a अश्विनावेह गच्छतं नासत्या मा वि वेनतम् ।

5.078.01c हंसाविव पततमा सुताँ उप ॥

5.078.02a अश्विना हरिणाविव गौराविवानु यवसम् ।

5.078.02c हंसाविव पततमा सुताँ उप ॥

5.078.03a अश्विना वाजिनीवसू जुषेथां यज्ञमिष्टये ।

5.078.03c हंसाविव पततमा सुताँ उप ॥

5.078.04a अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमानेव योषा ।

5.078.04c श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना शंतमेन ॥

5.078.05a वि जिहीष्व वनस्पते योनिः सूष्यन्त्या इव ।

5.078.05c श्रुतं मे अश्विना हवं सप्तवध्रिं च मुञ्चतम् ॥

5.078.06a भीताय नाधमानाय ऋषये सप्तवध्रये ।

5.078.06c मायाभिरश्विना युवं वृक्षं सं च वि चाचथः ॥

5.078.07a यथा वातः पुष्करिणीं समिङ्गयति सर्वतः ।

5.078.07c एवा ते गर्भ एजतु निरैतु दशमास्यः ॥

5.078.08a यथा वातो यथा वनं यथा समुद्र एजति ।

5.078.08c एवा त्वं दशमास्य सहावेहि जरायुणा ॥

5.078.09a दश मासाञ्छशयानः कुमारो अधि मातरि ।

5.078.09c निरैतु जीवो अक्षतो जीवो जीवन्त्या अधि ॥

5.079.01a महे नो अद्य बोधयोषो राये दिवित्मती ।

5.079.01c यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥

5.079.02a या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः ।

5.079.02c सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥

5.079.03a सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः ।

5.079.03c यो व्यौच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥

5.079.04a अभि ये त्वा विभावरि स्तोमैर्गृणन्ति वह्नयः ।

5.079.04c मघैर्मघोनि सुश्रियो दामन्वन्तः सुरातयः सुजाते अश्वसूनृते ॥

5.079.05a यच्चिद्धि ते गणा इमे छदयन्ति मघत्तये ।

5.079.05c परि चिद्वष्टयो दधुर्ददतो राधो अह्रयं सुजाते अश्वसूनृते ॥

5.079.06a ऐषु धा वीरवद्यश उषो मघोनि सूरिषु ।

5.079.06c ये नो राधांस्यह्रया मघवानो अरासत सुजाते अश्वसूनृते ॥

5.079.07a तेभ्यो द्युम्नं बृहद्यश उषो मघोन्या वह ।

5.079.07c ये नो राधांस्यश्व्या गव्या भजन्त सूरयः सुजाते अश्वसूनृते ॥

5.079.08a उत नो गोमतीरिष आ वहा दुहितर्दिवः ।

5.079.08c साकं सूर्यस्य रश्मिभिः शुक्रैः शोचद्भिरर्चिभिः सुजाते अश्वसूनृते ॥

5.079.09a व्युच्छा दुहितर्दिवो मा चिरं तनुथा अपः ।

5.079.09c नेत्त्वा स्तेनं यथा रिपुं तपाति सूरो अर्चिषा सुजाते अश्वसूनृते ॥

5.079.10a एतावद्वेदुषस्त्वं भूयो वा दातुमर्हसि ।

5.079.10c या स्तोतृभ्यो विभावर्युच्छन्ती न प्रमीयसे सुजाते अश्वसूनृते ॥

5.080.01a द्युतद्यामानं बृहतीमृतेन ऋतावरीमरुणप्सुं विभातीम् ।

5.080.01c देवीमुषसं स्वरावहन्तीं प्रति विप्रासो मतिभिर्जरन्ते ॥

5.080.02a एषा जनं दर्शता बोधयन्ती सुगान्पथः कृण्वती यात्यग्रे ।

5.080.02c बृहद्रथा बृहती विश्वमिन्वोषा ज्योतिर्यच्छत्यग्रे अह्नाम् ॥

5.080.03a एषा गोभिररुणेभिर्युजानास्रेधन्ती रयिमप्रायु चक्रे ।

5.080.03c पथो रदन्ती सुविताय देवी पुरुष्टुता विश्ववारा वि भाति ॥

5.080.04a एषा व्येनी भवति द्विबर्हा आविष्कृण्वाना तन्वं पुरस्तात् ।

5.080.04c ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥

5.080.05a एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात् ।

5.080.05c अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात् ॥

5.080.06a एषा प्रतीची दुहिता दिवो नॄन्योषेव भद्रा नि रिणीते अप्सः ।

5.080.06c व्यूर्ण्वती दाशुषे वार्याणि पुनर्ज्योतिर्युवतिः पूर्वथाकः ॥

5.081.01a युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।

5.081.01c वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥

5.081.02a विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।

5.081.02c वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ॥

5.081.03a यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा ।

5.081.03c यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना ॥

5.081.04a उत यासि सवितस्त्रीणि रोचनोत सूर्यस्य रश्मिभिः समुच्यसि ।

5.081.04c उत रात्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभिः ॥

5.081.05a उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव यामभिः ।

5.081.05c उतेदं विश्वं भुवनं वि राजसि श्यावाश्वस्ते सवित स्तोममानशे ॥

5.082.01a तत्सवितुर्वृणीमहे वयं देवस्य भोजनम् ।

5.082.01c श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि ॥

5.082.02a अस्य हि स्वयशस्तरं सवितुः कच्चन प्रियम् ।

5.082.02c न मिनन्ति स्वराज्यम् ॥

5.082.03a स हि रत्नानि दाशुषे सुवाति सविता भगः ।

5.082.03c तं भागं चित्रमीमहे ॥

5.082.04a अद्या नो देव सवितः प्रजावत्सावीः सौभगम् ।

5.082.04c परा दुष्ष्वप्न्यं सुव ॥

5.082.05a विश्वानि देव सवितर्दुरितानि परा सुव ।

5.082.05c यद्भद्रं तन्न आ सुव ॥

5.082.06a अनागसो अदितये देवस्य सवितुः सवे ।

5.082.06c विश्वा वामानि धीमहि ॥

5.082.07a आ विश्वदेवं सत्पतिं सूक्तैरद्या वृणीमहे ।

5.082.07c सत्यसवं सवितारम् ॥

5.082.08a य इमे उभे अहनी पुर एत्यप्रयुच्छन् ।

5.082.08c स्वाधीर्देवः सविता ॥

5.082.09a य इमा विश्वा जातान्याश्रावयति श्लोकेन ।

5.082.09c प्र च सुवाति सविता ॥

5.083.01a अच्छा वद् तवसं गीर्भिराभि स्तुहि पर्जन्यं नमसा विवास ।

5.083.01c कनिक्रदद्वृषभो जीरदानू रेतो दधात्योषधीषु गर्भम् ॥

5.083.02a वि वृक्षान्हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात् ।

5.083.02c उतानागा ईषते वृष्ण्यावतो यत्पर्जन्य स्तनयन्हन्ति दुष्कृतः ॥

5.083.03a रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान्कृणुते वर्ष्याँ३ अह ।

5.083.03c दूरात्सिंहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं१ नभः ॥

5.083.04a प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः ।

5.083.04c इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति ॥

5.083.05a यस्य व्रते पृथिवी नन्नमीति यस्य व्रते शफवज्जर्भुरीति ।

5.083.05c यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥

5.083.06a दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः ।

5.083.06c अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥

5.083.07a अभि क्रन्द् स्तनय गर्भमा धा उदन्वता परि दीया रथेन ।

5.083.07c दृतिं सु कर्ष विषितं न्यञ्चं समा भवन्तूद्वतो निपादाः ॥

5.083.08a महान्तं कोशमुदचा नि षिञ्च स्यन्दन्तां कुल्या विषिताः पुरस्तात् ।

5.083.08c घृतेन द्यावापृथिवी व्युन्धि सुप्रपाणं भवत्वघ्न्याभ्यः ॥

5.083.09a यत्पर्जन्य कनिक्रदत्स्तनयन्हंसि दुष्कृतः ।

5.083.09c प्रतीदं विश्वं मोदते यत्किं च पृथिव्यामधि ॥

5.083.10a अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उ ।

5.083.10c अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषाम् ॥

5.084.01a बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि ।

5.084.01c प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥

5.084.02a स्तोमासस्त्वा विचारिणि प्रति ष्टोभन्त्यक्तुभिः ।

5.084.02c प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ॥

5.084.03a दृळ्हा चिद्या वनस्पतीन्क्ष्मया दर्धर्ष्योजसा ।

5.084.03c यत्ते अभ्रस्य विद्युतो दिवो वर्षन्ति वृष्टयः ॥

5.085.01a प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुताय ।

5.085.01c वि यो जघान शमितेव चर्मोपस्तिरे पृथिवीं सूर्याय ॥

5.085.02a वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु ।

5.085.02c हृत्सु क्रतुं वरुणो अप्स्वग्निं दिवि सूर्यमदधात्सोममद्रौ ॥

5.085.03a नीचीनबारं वरुणः कवन्धं प्र ससर्ज रोदसी अन्तरिक्षम् ।

5.085.03c तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम ॥

5.085.04a उनत्ति भूमिं पृथिवीमुत द्यां यदा दुग्धं वरुणो वष्ट्यादित् ।

5.085.04c समभ्रेण वसत पर्वतासस्तविषीयन्तः श्रथयन्त वीराः ॥

5.085.05a इमामू ष्वासुरस्य श्रुतस्य महीं मायां वरुणस्य प्र वोचम् ।

5.085.05c मानेनेव तस्थिवाँ अन्तरिक्षे वि यो ममे पृथिवीं सूर्येण ॥

5.085.06a इमामू नु कवितमस्य मायां महीं देवस्य नकिरा दधर्ष ।

5.085.06c एकं यदुद्ना न पृणन्त्येनीरासिञ्चन्तीरवनयः समुद्रम् ॥

5.085.07a अर्यम्यं वरुण मित्र्यं वा सखायं वा सदमिद्भ्रातरं वा ।

5.085.07c वेशं वा नित्यं वरुणारणं वा यत्सीमागश्चकृमा शिश्रथस्तत् ॥

5.085.08a कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म ।

5.085.08c सर्वा ता वि ष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः ॥

5.086.01a इन्द्राग्नी यमवथ उभा वाजेषु मर्त्यम् ।

5.086.01c दृळ्हा चित्स प्र भेदति द्युम्ना वाणीरिव त्रितः ॥

5.086.02a या पृतनासु दुष्टरा या वाजेषु श्रवाय्या ।

5.086.02c या पञ्च चर्षणीरभीन्द्राग्नी ता हवामहे ॥

5.086.03a तयोरिदमवच्छवस्तिग्मा दिद्युन्मघोनोः ।

5.086.03c प्रति द्रुणा गभस्त्योर्गवां वृत्रघ्न एषते ॥

5.086.04a ता वामेषे रथानामिन्द्राग्नी हवामहे ।

5.086.04c पती तुरस्य राधसो विद्वांसा गिर्वणस्तमा ॥

5.086.05a ता वृधन्तावनु द्यून्मर्ताय देवावदभा ।

5.086.05c अर्हन्ता चित्पुरो दधेंऽशेव देवावर्वते ॥

5.086.06a एवेन्द्राग्निभ्यामहावि हव्यं शूष्यं घृतं न पूतमद्रिभिः ।

5.086.06c ता सूरिषु श्रवो बृहद्रयिं गृणत्सु दिधृतमिषं गृणत्सु दिधृतम् ॥

5.087.01a प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।

5.087.01c प्र शर्धाय प्रयज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ॥

5.087.02a प्र ये जाता महिना ये च नु स्वयं प्र विद्मना ब्रुवत एवयामरुत् ।

5.087.02c क्रत्वा तद्वो मरुतो नाधृषे शवो दाना मह्ना तदेषामधृष्टासो नाद्रयः ॥

5.087.03a प्र ये दिवो बृहतः शृण्विरे गिरा सुशुक्वानः सुभ्व एवयामरुत् ।

5.087.03c न येषामिरी सधस्थ ईष्ट आँ अग्नयो न स्वविद्युतः प्र स्यन्द्रासो धुनीनाम् ॥

5.087.04a स चक्रमे महतो निरुरुक्रमः समानस्मात्सदस एवयामरुत् ।

5.087.04c यदायुक्त त्मना स्वादधि ष्णुभिर्विष्पर्धसो विमहसो जिगाति शेवृधो नृभिः ॥

5.087.05a स्वनो न वोऽमवान्रेजयद्वृषा त्वेषो ययिस्तविष एवयामरुत् ।

5.087.05c येना सहन्त ऋञ्जत स्वरोचिष स्थारश्मानो हिरण्ययाः स्वायुधास इष्मिणः ॥

5.087.06a अपारो वो महिमा वृद्धशवसस्त्वेषं शवोऽवत्वेवयामरुत् ।

5.087.06c स्थातारो हि प्रसितौ संदृशि स्थन ते न उरुष्यता निदः शुशुक्वांसो नाग्नयः ॥

5.087.07a ते रुद्रासः सुमखा अग्नयो यथा तुविद्युम्ना अवन्त्वेवयामरुत् ।

5.087.07c दीर्घं पृथु पप्रथे सद्म पार्थिवं येषामज्मेष्वा महः शर्धांस्यद्भुतैनसाम् ॥

5.087.08a अद्वेषो नो मरुतो गातुमेतन श्रोता हवं जरितुरेवयामरुत् ।

5.087.08c विष्णोर्महः समन्यवो युयोतन स्मद्रथ्यो३ न दंसनाप द्वेषांसि सनुतः ॥

5.087.09a गन्ता नो यज्ञं यज्ञियाः सुशमि श्रोता हवमरक्ष एवयामरुत् ।

5.087.09c ज्येष्ठासो न पर्वतासो व्योमनि यूयं तस्य प्रचेतसः स्यात दुर्धर्तवो निदः ॥

Notes by Detlef Eichler (detlefeichler@googlemail.com):

1. Please note that this PDF file is not for commercial use and released only for personal scholarly activity.

2. This Devanāgarī version of Rigveda is from an ITRANS file which I have created on the basis of The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda. (http://www.people.fas.harvard.edu/~witzel/onlineRV.htm)

3. The font used for the Rigveda text is Ancient Sanskrit 99. For the numbers of Maṇḍala, Sūkta, and Mantra at the beginning of each line (1.001.01a) the font Times New Roman is used.

4. Last updated: 19 May 2010